नं: २४-घ

आख्यात चन्द्रिका (व्याकरणम्)

पत्राणि ६६

नं०: 24-घ

आख्यात चन्द्रिका

आख्यात चंद्रिका
पत्राणि ६६

२४

नं० : २४-घ
आख्यात चान्द्रिका (व्याकरणम्)
पत्राणि ६६

नं २४६

व्याकरण

नं. २४





आ॰च॰

श्रीगणेशायनमः॥ अथाख्यातप्रक्रियानिरूप्यते॥ धातोः॥ वक्ष्यमानाः प्रत्ययाधातोर्ज्ञे
याः॥ भ्वादिः॥ भूसत्तायामित्यादिशब्दोधातुसंज्ञोभवति॥ धातुत्वात्तिवादयः॥ सचत्रिवि
धः॥ आत्मनेपदीपरस्मैपदीउभयपदीचेति॥ आदनुदात्तङितः॥ अनुदात्तेतोङितश्चधा
तोरादित्यात्मनेभवंति॥ ञितस्वरितेतउभे॥ ञितःस्वरितेतश्चधातोरुभेआत्मनेपदपरस्मैप
देभवतः॥ उभयपदप्राप्तौप्रयोगनियममाह॥ आत्मगामिचेत्क्रियाफलंआत्मनेपदंपरगा
मिचेत्फलंपरस्मैपदंप्रयोक्तव्यं॥ अन्वर्थात्॥ परतोऽन्यत्॥ पूर्वोक्तनिमित्तविधुरादन्यस्मा
द्धातोःपरस्मैपदंभवति॥ नवपरस्मैपदानि॥ तिबादीनामष्टादशसंख्यकानामाद्यानिनव
वचनानिपरस्मैपदसंज्ञकानिभवंति॥ पराण्यात्मनेपदानि॥ पराणिनववचनानिआत्म
नेपदसंज्ञकानिभवंति॥ वर्त्तमाने॥ तिप् तस् अंति॥ सिप् थस् थ॥ मिप् वस् मस्॥ तेआ

१

तत्रांते॥ सु आथे थ्वा॥ एव हे महे॥ प्रारब्धोपरि समाप्तक्रियोपलक्षितो वर्त्तमानः कालः॥ तस्मि
न् भिधेयेतिवादयः प्रत्यया भवंति॥ अस्य तिवादेः पाणिनीयानां लडिति संज्ञा॥ नाम्नि य यु
ष्मद्व्या स्मदि च भागेः प्रथम मध्यमो त्तमाः॥ नामादिषूपपदेषु सत्सु त्रिभिर्भागैरेते प्रत्यया
भवंति॥ नाम्नि प्रयुज्यमाने च यशब्दाद् प्रयुज्यमानेऽपि प्रथमः पुरुषो भवति॥ युष्मदि प्रयुज्य
मानेऽपि मध्यम पुरुषो भवति॥ तथैवास्मदि प्रयुज्यमाने उत्तम पुरुषो भवति॥ कर्त्तरि पंच
परस्मैपदं कर्त्तरि भवति॥ चकारादात्मनेपदमपि॥ तत्र भ्वृ इत्येतस्मात्परस्मैपदिनोऽविव
रणात्तिवादयो योज्यंते॥ तत्रैकत्वविवक्षायां प्रथमपुरुषैकवचने तिप्॥ भू ति प् इति स्थिते
पकारः पित्कार्यार्थः॥ अप् कर्त्तरि॥ धातोरप् प्रत्ययो भवति॥ कर्त्तरि विहितेषु तिवादिषु
चतुर्ष्वादि रूपपर्यंतेषु परतः॥ पकारो विकरणमेदज्ञापनार्थो गुणार्थश्च॥ विभज्य गणोवि
भाग धातूनां करोति इति विकरणः॥ गुणः॥ धातोरंत्य भूतस्य नामिनो गुणो भवति॥ अत्र

देशो भवति ॥ धातुगणमेदज्ञापकः प्रत्ययः अधिकरणं ॥ द्व्यर्थविवक्षायां भूतस इति स्थि
ते ॥ अपित्तादिर्ङित् ॥ पकारेतं तादिकं च विहायान्यप्रत्ययो ङित्संज्ञको भवति ॥ क्ङित्यघुसि
क्ङिति ङितिपरे धातोर्गुणो न भवति घुसं वर्जयित्वा कृतद्विर्वचनाद्घुसि परे गुणो भवत्येव ॥
ततो ङित्वात्तसि गुणप्रतिषेधे प्राते ऽपप्रत्ययानिमित्तो गुणो भवत्येव ॥ सो विसर्गः ॥
भवतः ॥ बह्वर्थविवक्षायां भव अन्ति इति स्थिते ॥ अदे ॥ अकारस्य लोपो भवति ॥ अकारे एका
रे च परे ॥ भवन्ति ॥ भवसि भवथः भवथ ॥ आेरा ॥ अकारस्या त्वं भवति वकारे मकारे च परे ॥
भवामि भवावः भवामः ॥ स राजा धार्मिको भवति ॥ त्वं साधुर्भवसि ॥ अहमात्मविद्भवामि
इत्यादि प्रयोक्तव्यं ॥ स त्रक्रमेण पुरुषप्रयोगो भवति ॥ साधूस च त्वं च भवथः ॥ अव्ययधानो
च पुरुषविशेषः ॥ स च त्वं चाहं च भवामः ॥ भूधातुरात्मनेपदी तस्मात्तेप्रभृतीनि नववच
नानि योज्यानि ॥ अपगुणः ॥ अवादेशः भवते ॥ आदाथई ॥ अकारात्परस्य आत आथ सर्वे

घिनत्र्याकारस्यईकारोभवति॥भवेते॥अदोभवंते भवसेभवेथे भवध्वे॥भवेभवामहेभ
वामहे इत्यादि॥विधिसंभावनयोः॥यात्याताम्युस् यास्यातं यात यांयाव याम॥ईत
ईयातां ईरन् ईथास् ईयाथां ईध्वं ईय ईवहि ईमहि॥विधिः कर्त्तव्यार्थोपदेशः॥संभा
वनं कल्पनमूहः॥तत्र पदादयः प्रत्ययाभवंति॥लिङितियेषां संज्ञा पाणिनीयानां॥या॥आका
रात्परोयाईर्भवति॥अइत्॥भवेत्॥भवेतां॥युसइद्॥अकारात्परस्ययुसइद्भवति भवेयुः
भवेः भवेतं भवेत॥यामियं॥अकारात्परोयामियंभवति॥भवेयं॥भवेव॥भवेम॥शिष्यार्
गुरुं शुश्रूषेत॥इतिविधिः॥भवेदसौवेदपारगोब्राह्मणत्वात् संभावनं॥भवेत भवेया
तां भवेरन्॥भवेथाः भवेयाथां भवेध्वं भवेय भवेवहि भवेमहि॥आशीःप्रेरणयोः॥तुप्
तां अंतु हितंत आनिप् आवप् आमप्॥तां आतां अंतां॥स्व आथां ध्वं ऐप् आव
हैप् आमहैप्॥अप्राप्तस्यार्थस्य माशीः परस्येष्टार्थशंसनं प्रेरणं प्रवर्त्तनं वा॥तत्रतुवादयः

श्रु४

प५

आ॰ च॰

प्रत्यया भवंति॥ एषां च संज्ञा पाणिनीयानां लोट्॥ तुह्योस्तातङ् आशिषि वा वक्तव्यः॥ भव तु॥ भवतात्॥ भवतां॥ भवंतु॥ अतः॥ अकारादुत्तरस्य हेर्लुग्भवति॥ भव॥ भवतात्॥ भ वतं॥ भवत॥ भवानि॥ भवाव॥ भवाम॥ आयुष्मान् भवतु भवान्॥ अध्ययनाय उद्यतो भव सौम्य॥ भवतां॥ भवेतां॥ भवंतां॥ भवस्व॥ भवेथां॥ भवध्वं॥ भवै॥ भवावहै॥ भवामहै॥ त्वं हरि भवस्व॥ अनद्यतनेऽतीते॥ दिप् तां अन्। सिप् तंत। अमि प्वःमः तन्। आतां अंत॥ था स आथां ध्वं इ वहि महि॥ अतीतायाः रात्रेर्यामद्वयादर्वाक् यावदागामिन्याः प्रथमं याम द्वयं दिवसः सकलः सोऽद्यतनः ततोऽन्यो अनद्यतनस्तस्मिन्नऽतीते काले दिवादयः प्रत्यया भवंति॥ एषां च संज्ञा पाणिनीयानां लङ्॥ दिसिमिङ् इत्येतेषामिकार उच्चारणार्थः॥ तनो नकार इत् तन्यकर्तरीति विशेषणार्थः॥ वावसाने इति दकारस्य तकारः॥ दिवाबड्॥ दिवादौ परे धातोरडागमो भवति॥ टित्वादादौ॥ अभवत्॥ अभवतां॥ अभवन्॥ अभवः॥

॥ ३ ॥

३

अभवतं अभवत अभवं अभवाव अभवाम॥ ह्योभवत्यत्र॥ इत्यादि॥ अभवत अभवेतां अभ
वंत अभवथाः अभवेथां अभवध्वं अभवे अभवावहि अभवामहि स राज्यमभवत् इत्यादि
परोक्षे॥ णप् अतुस् उस् थप अथुस अ णप् वम॥ ए आते इरे से आथे ध्वे ए वहे महे॥ धातोः
परोक्षे अतीतकाले णवादयः प्रत्यया भवंति॥ एषां संज्ञा पाणिनीयां लिट्॥ णादिः कित्॥ अपित् णादि
र्किर्भवति॥ णवादिसंयोगे धातोर्द्विर्वचनं भवति॥ सस्वर आदिर्द्विरुक्तिः॥ सस्वर आद्योऽवयवो द्विरुक्तो
द्विर्भवति॥ भस्त णपुस्पिते णकारो वृद्ध्यर्थः पकारः पित्कार्यार्थः॥ आभ्वोर्णादौ पूर्वस्याकारस्य भू
शब्दस्य च आकारो भवति॥ णादौ सति ह्रस्वः॥ पूर्वसंबंधिनो दीर्घस्य ह्रस्वो भवति॥ कपानां जवच
पाः॥ पूर्वसंबंधिनां कपानां जवाश्चपा भवंति॥ झढधघभानां जडदगबा भवंति॥ खफछठथानां च टत
कपा भवंति॥ भुवो वुक्॥ भुवो वुगागमो भवति॥ णवादौ स्वरे परे॥ बभूव॥ बभूवतुः॥ बभूवुः॥ क्रादेर्णा
दौ॥ कृ स भृ वृ द्रु स्तु स्रु श्रु इत्येतस्मात्परस्य वसादेर्णादेर्गणस्य इडागमो न भवति॥ अन्यस्मादनिटोपि इ

डागमो भवति॥ थपौ वेट्॥ अनिटो धातन्नां थपो वा इडागमो भवति॥ बभूविथ॥ बभूवथुः॥ बभूव॥ बभूव॥
बभूविव॥ बभूविम॥ वलिर्वल्लवान्नू बभूय॥ बभूवे॥ बभूवाते॥ बभूविरे॥ बभूविषे॥ बभूवाथे॥ नामि
नोन्तस्तीं धो ढः॥ नाम्यंतात् धातोरुत्तरस्यादिवादिषु चतुर्षु व्यतिलिट्स्य धस्य ढो भवति॥ अत्र सेटो
हलाद्वेति वक्तव्यं॥ बभूविध्वे॥ बभूविढ्वे॥ बभूवे॥ बभूविवहे॥ बभूविमहे॥ रामो राज्यं बभूवे
आशिषि॥ यात्॥ यास्तां॥ यासुः॥ याः॥ यास्तं॥ यास्त॥ यासं॥ यास्व॥ यास्म॥ सीष्ट॥ सीयास्तां॥ सी
रण॥ सीष्ठाः॥ सीयास्थां॥ सीध्वं॥ सीय॥ सीवहि॥ सीमहि॥ धातोराशिषि यादादयो भवंति॥ एषां
संज्ञापाणिनीयानां आशीर्लिङ्॥ भूयात्॥ भूयास्तां॥ भूयासुः॥ भूयाः॥ भूयास्तं॥ भूयास्त॥ भूया
सं॥ भूयास्व॥ भूयास्म॥ स्वश्रीमोन्भूयात्॥ आशीर्यादादेष्वंकिदिति वक्तव्यं॥ ततो गुणाभावः॥
भविषीष्ट॥ भविषीयास्तां॥ भविषीरन्॥ भविषीष्ठाः॥ भविषीयास्थां॥ भविषीढ्वं॥ भविषीय॥ भवि
षीवहि॥ भविषीमहि॥ हरिभक्तिं भविषीष्ठाः॥ स्यस्तने॥ ता॥ तारौ॥ तारः॥ तासि॥ तास्थः॥ ता

सिसतासीस्यपामिट् धातोः परेषां सिसतासीस्यपामित्येतेषामिडागमो भवति २॥ भविषीढ्वं २॥

४

४ भविता भवितारौ भवितारः भवितासि भवितासाथे ४

स्या। तास्मि। तास्वः। तास्मः। ता। तारौ। तारः। तासे। तासाथे। ताध्वे। ताहे। तास्वहे। तास्महे। श्वो भाविन्यर्थे तादयो भवंति॥ एषां संज्ञा पाणिनीयानां लुट्॥ ट्गुण अव॥ भविता। भवितारौ। भवितारः। भवितासि। भवितास्थः॥ भविता ~~भवितास्थ~~ स्थ॥ भवितास्मि। भवितास्वः। भवितास्मः। स्वर्ते हरिः॥ प्रत्यक्षो भविता॥ भविता ऽहं भवी। हे। भविस्वहे॥ त्यादो भविष्यति स्य प्र॥ धातोर्भविष्यति काले स्य प्रत्ययो भवतीति वादिष्ठ्या दशपरेषु॥ एषां संज्ञा पाणिनीयानां ऌट्॥ भविष्यति। भविष्यतः। भविष्यंति। भविष्यसि। भविष्यथः। भविष्यथ। भविष्यामि। भविष्यावः। भविष्यामः। ~~भविता भवितारौ भवितारः। भवितासे। भवितासाथे~~। भविष्यते। भविष्येते। भविष्यंते। भविष्यसे। भविष्यध्वे। भविष्ये। भविष्यावहे। भविष्यामहे। स्यप्रक्रियाअतिक्रमे॥ क्रियायाऽतिक्रमेऽर्थे कुतश्चिदनिष्पत्तौ सत्यां दिवादिपरे स्य प्रत्ययो भवति धक् चिद्भूते पि॥ अस्य संज्ञा लिङ्॥ अभविष्यत। अभविष्यतां। अभविष्यन्। अभविष्यः

॥ भविष्यथे ३

भविता स्महे ४

अभविष्यतं।अभविष्यत।अभविष्यं।अभविष्याव।अभविष्याम॥यदिस्रष्टिः स्रराज्यं
याभविष्यत्।तदास्रभिक्षमभविष्यत्॥अभविष्यत॥अभविष्येतां।अभविष्यंत।अ
भविष्यथाः॥अभविष्यध्वं।अभविष्ये।अभविष्यावहि।अभविष्यामहि॥भवान्यदिध
नं अभविष्यत्।तदास्रखमभविष्यत्।भूतेसिः॥धातोर्भूतमात्रेकालेसिप्रत्ययो भवति दि
वादिपरतः॥अस्यसंज्ञालुङ्॥इकारसेरितिविशेषणार्थः॥दिवादावङ्॥अभूसतइतिस्थि
ति॥दादेषो॥यिपरस्मैपदपरेदाधास्याइनभूपिवतिभ्यः परस्यसेर्लोपोभवति॥सा छासाघ्रा
धेयां वासिलोपोवक्तव्यः॥भुवः सिलोपेस्वरे वुग्वक्तव्यः॥तेनगुणाइङ्स्थयोन॥अभूत्
अभूतां।अभूवन्।अभूः।अभूतं।अभूत।अभूवं।अभूव।अभूम।अभूः॥
आत्मनेपदेसिइङ्गुणाबाधत्वंकुत्वंअङ्॥अभविष्टाः।अभविषातां।आतोअंतोदंतः
॥आतआत्मनेपदस्यअंतइत्यस्यादभवति॥अनकारादुत्तरस्य॥अभविषत॥

माङ्सिरे स्मसहितेद्विवाद्विवा २

अन्वविष्टाः। अन्वविषाथां। घ्वेचसेर्लोपः। अभविष्वं। अभविषि। अभविष्वहि। अभविष्महि। माङ्लु
माङि लुङेववाच्यः। माङ्। माशब्देप्रयुज्यमाने अटोर्लोपो भवति। माहस्मभक्तो भवान् अभूत। स्मयोगे
लङ्। मास्मभवत्। मास्मभूत॥ चितीसंज्ञाने॥ इकारइद्दित्कार्यार्थः। पूर्ववत्तिवादयः॥ अपकर्त्त
रीत्यप्॥ उपधायालघोः॥ धातोरूपधाभूतनामिनोलघोर्गुणोभवति॥ चेतति। चेततः॥ चेतंति॥ चेतसि
चेतथः॥ चेतथ॥ व्मोरा॥ चेतामि॥ चेतावः॥ चेतामः॥ चेतेत॥ चेततां॥ चेतेयुः॥ चेततु॥ चेतता त्॥ चेततां
चेतंतु॥ अचेतत्॥ अचेततां॥ अचेतन्॥ पूर्वस्याहसादिशेषः॥ पूर्वस्यआदिर्हसःशिष्यतेऽन्यो लुप्य
ते॥ चिचेत॥ चिचितुः॥ चिचितुः॥ चिचेतिथ॥ चिचितथुः॥ चिचितुः॥ चिचेत॥ चिचितिव॥ चिचितिम
क्वित्याद्गुणाभावः॥ चित्यात्॥ चित्यास्तां॥ चित्यासुः॥ चेतिता॥ चेतितारौ॥ चेतितारः॥ चेतिष्यति
चेतिष्येतः॥ चेतिष्यंति॥ अचेतिष्यत्॥ अचेतिष्यतां॥ अचेतिष्यन्॥ इत्यादि॥ चितिसिदिपृइह्
से॥ सिशब्दादुत्तरयोर्दिस्योरीडागमोभवति॥ इहइटि॥ इटउत्तरस्यसेर्लोपोभवति इटिपरे॥ अ

आ॰ चं॰

चेतितम्॥ अचेतिष्टां॥ अचेतिषुः॥ अचेतीः॥ अचैष्टं॥ अचेतिष्ट॥ अचेतिषं॥ अचेतिष्व॥ अचेतिष्म॥ इत्यादि॥ इरनुबंधः॥ च्युतिर् [illegible] सेचने॥ इरितो वेति विशेषणार्थः॥ च्योतति॥ च्योततः॥ च्योतंति॥ च्योतसि॥ च्योतथः॥ च्योतथ॥ च्योतेत्॥ च्योतेतां॥ च्योतेयुः॥ च्योततु॥ च्योततात्॥ च्योततां॥ च्योतंतु॥ अच्योतत्॥ चुच्युतउः॥ चुच्युतुः॥ चुच्योतिथ॥ चुच्युतथुः॥ चुच्युतौ॥ चुच्युतिव॥ चुच्युतिम॥ च्युत्यात्॥ च्युत्यास्तां॥ च्युत्यासुः॥ च्योतिता॥ च्योतितारौ॥ च्योतितारः॥ च्योतिष्यति॥ च्योतिष्यतः॥ च्योतिष्यंति॥ अच्योतिष्यत्॥ अच्योतिष्यतां॥ अच्योतिष्यन्॥ अच्योतीत्॥ अच्योतिष्टां॥ अच्योतिषुः॥ इत्यादि॥ इरितो वा॥ इरितो धातोः अङ् प्रत्ययो भवति॥ सेरपवादः॥ उकारो गुणनिषेधार्थः॥ अच्युतत्॥ अच्युततां॥ अच्युतन्॥ इत्यादि॥ श्च्युतिर् क्षरणे॥ इरनुबंधः॥ इरितो वेति विशेषणार्थः॥ श्च्योतति॥ श्च्योततः॥ श्च्योतंति॥ श्च्योतेत्॥ श्च्योतेतां॥ श्च्योतेयुः॥ श्च्योततु॥ श्च्योततात्॥ श्च्योततां॥ श्च्योतंतु॥ अश्च्योतत्॥ अश्च्योततां॥ अश्च्योतन्॥ द्वित्वं न श्च सात्वपाः॥ द्विर्वचने कृते सति यत्र वर्ण

॥ चुश्चुतव ॥

पंतस्यश्च सादुत्तरः स्वपाशिष्यते॥ नश्च सः इतिचकारश्चेषश्च कारलोपः॥ चुश्च्योत। चुश्च्योततुः

चुश्च्युतुः। चुश्च्योतिथ। चुश्च्युतथुः। चुश्च्योत। चुश्च्युतिव। चुश्च्युतिम॥ कित्वाद्गुणाभावः॥ श्च्युत्या

त्। श्च्युत्यास्तां। श्च्युत्यासुः॥ श्च्योतिता। श्च्योतिष्यति। अश्च्योतिष्यत्। अश्च्योतीत्। अश्च्योति

ष्टां। अश्च्योतिषुः॥ अङ् पक्षे अश्च्युतत्॥ इत्यादि॥ मंथ विलोडने॥ मंथति। मंथतः। मंथंति। मंथे

त्। मंथेतां। मंथेयुः। मंथतु। मंथतात्। मंथतां। मंथंतु। अमंथत्। अमंथतां। अमंथन्॥ द्विश्चेति

द्वित्वं॥ नमंथाञ्जो लोपः॥ धातोरुपधाभूतस्य नकारस्य लोपो भवति कितिङिति च परे॥ इति

नकारलोपप्राप्ते असंयोगात्तु नो दरकित्वं वाच्यं॥ तेन न लोपाभावः॥ ममंथतुः। ममंथुः। नोला

पः॥ मथ्यात्। मथ्यास्तां। मथ्यासुः। मंथिता। मंथितारौ। मंथितारः। मंथिष्यति। मंथिष्यतः।

मंथिष्यंति। अमंथिष्यत्। अमंथिष्यतां। अमंथिष्यन्। अमंथीत्। अमंथिष्टां। अमंथिषुः।

कुथिपुथिलुथिहिंसासंक्लेशनयोः॥ इकार इदित्कार्यार्थः॥ इदितो॥ इदितो धातोर्नुमागमो

सा० २०

भवति॥ कुंथति॥ कुंथतः॥ कुंथंति॥ कुंथेत्॥ कुंथेतां॥ कुंथेयुः॥ कुंथतु॥ कुंथतात्॥ कुंथतां॥ कुंथं
तु॥ अकुंथत्॥ अकुंथतां॥ अकुंथन्॥ द्विश्चेति द्वित्वं॥ कुहोश्चुः॥ पूर्वसंबंधिनोः कवर्गहका
रयोश्चुत्वं भवति॥ चुकुंथ॥ लघूपधत्वाभावाद्गुणः॥ इदितो नलोपाभावो वाच्यः॥ कुंथ्यात्
कुंथ्यास्तां॥ कुंथ्यासुः॥ कुंथिता॥ कुंथितारौ॥ कुंथितारः॥ कुंथिष्यति॥ कुंथिष्यतः॥ कुंथिष्यंति
अकुंथिष्यत्॥ अकुंथिष्यतां॥ अकुंथिष्यन्॥ अकुंथीत्॥ अकुंथिष्टां॥ अकुंथिषुः॥ षिधु ग
त्यां॥ उकार उदित्कार्यार्थः॥ आदेः ष्णः स्नः॥ षोपदेशस्य नोपदेशस्य च धातोरादौ वर्तमा
नयोः षकारणकारयोः सकारनकारौ भवतः॥ सिकृसृपृसृस्तृ स्यंदत्याजंतसादयः॥
षोपदेशाः स्मृताः ष्वष्क स्विद स्वद स्वंज स्वप स्मिङः॥ नोपदेशास्त्वनर्दनाथनाधनंद
नर्कनृनृतः॥ नकारजावनुस्वारपंचमौ झलि धातुषु॥ सकारजः शकारश्चुः ष्टुत्वाट्टवर्ग
स्तवर्गजः॥ नामधातुष्ठिवष्वष्कतीनां षस्तानेति वाच्यं गुणः॥ सेधति॥ निपूर्वः आदेशश्च तथा

७

मृत्यर्थस्यमेधन्तेनमः १

तोऽस्तनमां॥ प्रादेरुपसर्गात्परेषांस्वादीनांमादीनांच सकारस्य कारयोस्तौ स्त्वंभाविनावेवषका
रणकारौभवतः॥ षत्वणत्वनिमित्ते सति॥ निषेधति॥ सेधतः॥ सेधंति॥ सेधसि॥ सेधथः॥ से
धथ॥ सेधामि॥ सेधावः॥ सेधामः॥ सेधेत्॥ सेधेतां॥ सेधेयुः॥ सेधतु॥ सेधतात्॥ सेधतां
सेधतु॥ असेधत्॥ अडव्यवधानेपिषत्वं॥ न्यषेधत्॥ द्वित्वव्यवधानेपिषत्वं॥ निषिषेध॥ सि
सेध॥ सिसिधतुः॥ सिसिधुः॥ सिसेधिथ॥ सिध्यात्॥ सेधिता॥ सेधिष्यति॥ असेधीत्॥

असेधिष्यत्।

असेधिषं॥ असेधिषु॥ षिधूशास्त्रेमांगल्येच॥ ऊकारः इड्विकल्पार्थः॥ सेधति॥ सेधेत्
सेधतु॥ असेधत्॥ द्वित्वंगुणः॥ सिसेध॥ सिध्यात्॥ उदितोवा॥ उदितोधातोरिड्वाभवति
अचतुर्षुपरेषु॥ स्वरतिसूतिसूयतिधूञूदिद्भ्यः धादीनांमिड्वावक्तव्यः॥ सेधिता॥ पक्षे तथोर्ध्
दधातिंविनाझभांताद्धातोपरयोस्तकारथकारयोर्धकारादेशोभवति॥ झभानांजबचपा
सेद्धा॥ सेद्धारो॥ सेद्धारः॥ सेधिष्यति॥ सेत्स्यति॥ असेधिष्यत्॥ असेत्स्यत्॥ असे धी

रधनशाग्नपदपद्रुहमुहस्नुहस्निहांच ३ स्वरतिसूतिसूयतिधूञांकिद्वा सांदेशार्दोर्न्नितिस्वामिट् ३

त्॥ असेधिषां॥ असेधिषुः॥ इड्भावपक्षे॥ अनिटोनामिवतः॥ नामिवतोऽनिटो धातोःपर
स्मैपदपरे सिप्रत्यये वृद्धिर्भवति॥ च पत्यं से॥ असैत्सीत्॥ असात्॥ असाद्युत्तरस्य सेर्लोपो
भवति झसे परे॥ असैद्धां॥ असैत्सुः॥ असैत्सीः॥ असैद्धं॥ असैद्ध॥ असैत्सं॥ असैत्स्व॥ अ
सैत्स्म॥ खद स्थैर्ये हिंसायां च॥ खदति॥ खदेत्॥ खदतु॥ अखदत्॥ द्वित्वे इति द्वित्वं॥ अ
तउपधायावृद्धिः॥ अतोरूपधाया अकारस्य वृद्धिर्भवति णितिपरे॥ चुत्वं॥ चखाद॥ चखदतुः
चखदुः॥ चखदिथ॥ चखदथुः॥ चखद॥ णलुत्तमो वा णित् इत्यस्य॥ चखाद॥ चखद॥ च
खदिव॥ चखदिम॥ खद्यात्॥ खदिता॥ खदिष्यति॥ अखदिष्यत्॥ णित्ये॥ पिपरस्मै
पदपरे सिणिद्भवति॥ णित्वादतउपधाया इति वृद्धिः॥ अखादीत्॥ हलादेर्लघुकारोप
धस्य सोवा वृद्धिर्वक्तव्या॥ अखदीत्॥ अखादिष्टां॥ अखदिष्टां॥ अखादिषुः॥ अखदि
षुः॥ गद व्यक्तायां वाचि॥ गदति॥ उपसर्गस्यनिमित्तान्नेर्गदादौ णत्वं वाच्यं॥ प्रणिगदति॥

गद्दगादपदपतथुपिद्दाधास्थामामाङमेङस्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिदाम्यति [illegible]

जगाद

गदेत्॥ गदतु॥ अगदत्॥ द्वित्वं॥ चुत्वं॥ अत उपधाया वृद्धिः॥ जगेदतुः॥ जगदुः॥ गद्यात्॥
गदिता॥ गदिष्यति॥ अगदिष्यत्॥ अगादीत्॥ अगदीत्॥ रद विलेखने॥ रदति॥ रदेत्॥
रदतु॥ अरदत्॥ रराद॥ लोपः पचां कित्ये चास्य॥ पचादीनां मनादेशादीनां क्विति णयादौ सति
पूर्वस्य लोपो भवति॥ असंयुक्तहलस्तयोर्मध्यस्य अकारस्यैकारः॥ रेदतुः॥ रेदुः॥ सेटि थपि च
एत्वं [illegible] पूर्वलोपो वक्तव्यो॥ रेदिथ॥ रेदथुः॥ रेद॥ ररादं॥ ररद॥ रेदिव॥ रेदिम॥ रद्यात्॥ र
दिता॥ रदिष्यति॥ अरदिष्यत्॥ अरादीत्॥ अरदीत्॥ णद अव्यक्ते शब्दे॥ आदेः ष्णः स्नः॥
नदति॥ नदतः॥ नदंति॥ प्रपूर्वः॥ प्रादेश्चेति णत्वं॥ प्रणदति॥ प्रणिपूर्वः॥ नेर्गदेति णत्वं
प्रणिनदति॥ नदेत्॥ नदेतां॥ नदेयुः॥ नदतु॥ नदतात्॥ नदतां॥ नदंतु॥ अनदत्॥ अ
नदतां॥ अनदन्॥ द्वित्वं॥ अत उपधाया वृद्धिः॥ ननाद॥ नेदतुः॥ नेदुः॥ नेदथुः॥ नेद॥
ननाद॥ ननद॥ नेदिव॥ नेदिम॥ नद्यात्॥ नदिता॥ नदिष्यति॥ अनदिष्यत्॥ अनादी

तु॥आनदीत्॥ अर्दगतौयाचनेच॥ अर्दति॥ अर्दत्॥ अर्दतु॥ आ दवद्वित्वेसति॥ आन्वो
र्णादावित्यात्वं॥ आ अर्द इति स्थिते॥ नुगश्नां॥ आशादीनां धातूनां पूर्वस्य नुगागमो भवति
णवादौ सति॥ आनर्द॥ आनर्दतुः॥ आनर्दुः॥ आनर्दिथ॥ आनर्दथुः॥ आनर्द॥ आनर्दिव
आनर्दिम॥ अर्दीत्॥ अर्दिता॥ अर्दिष्यति॥ आर्दिष्यत्॥ आर्दीत्॥ आर्दिषां॥ आर्दिषुः॥ इदि
परमैश्वर्ये॥ इदित इति नुम्॥ इंदति॥ इंदत्॥ इंदतु॥ स्वरादेः॥ स्वरादेर्धातोर्द्वितीयोऽडाग
मो भवति॥ द्वित्वादौ परे॥ अ इ ण॥ ए ए ए॥ ऐन्दत्॥ ऐंदता॥ ऐंदन्॥ इंद णप इति स्थिते का
सादिप्रत्ययादामकृसभूपरः॥ कास आस दय अयनाम्यो दर्श रूपद्वातोरनेकस्वर धा
तुभ्यः प्रत्ययांताच्च णवादौ परे आमप्रत्ययो भवति॥ सच कृ अस भू परः प्रत्ययो भवति॥
विदरिद्राकासजागृउषएभ्योवा आमप्रत्ययो वक्तव्यः॥ इंदां॥ कृ णप इति स्थिते द्वित्वं॥
रः॥ पूर्वसंबंधिनो ऋकारस्य अकारादेशो भवति॥ चुत्वं॥ धातोर्नामिनः॥ धातोरंत्यस्य

तस्यनामिनोवृद्धिर्भवति॥ञितिणितिचपरे॥इंदांचकार॥ऋरं॥इंदांचकृतुः॥इंदांचकुः॥ऋादित्यान्नेट॥इंदांचकर्थ॥इंदांचकथुः॥इंदांचक॥इंदांचकार॥इंदांचकर॥इंदांचकृव॥इंदांचकृम॥इंदामास॥इंदामासतुः॥इंदामासुः॥ ॥इंदामासिथ॥इंदामासथुः॥इंदांबभूव॥इंद्यात्॥इंदिता॥इंदिष्यति॥ऐंदिष्यत्॥ऐंदीत्॥स्वरादेरितिद्वितीयोऽगमः॥ऐंदिष्टां॥ऐंदिषुः॥इत्यादि॥निदिकुत्सायां॥निंदति॥निंदेत्॥निंदतु॥अनिंदत्॥प्रपूर्वः॥निश्शंनिंदनिंदा॥उपसर्गाणत्वंवावक्तव्यं॥प्रणिंदति॥प्रनिंदति॥द्विश्चेतिद्वित्वं॥निनिंद॥निनिंदतुः॥निनिंदुः॥निंद्यात्॥निंदिता॥निंदिष्यति॥अनिंदिष्यत्॥अनिंदीत्॥उबगतौ॥गुणः॥ओबति॥ओबेत्॥ओबतु॥औबत्॥द्वित्वं॥उपधायागुणेचकृते॥असवर्णेस्वरे॥पूर्वस्यइकारस्यउकारस्यचइयुवौभवतः॥असवर्णेस्वरेपरे॥उवोब॥ऊबतुः॥ऊबुः॥उवोबिथ॥ऊबथुः॥उब्यात्॥

आ॰ चं॰

ओषिता॥ ओषिष्यति॥ औषिष्यत्॥ औषीत्॥ अंचु गतिपूजनयोः॥ अंचति॥ अंचेत्॥ अंचतु॥ आं-
चत्॥ नुगसामिति नुक्॥ आनंच॥ आनंचतुः॥ आनंचुः॥ पूजायामंचेर्न्न लोपाभावो वाच्यः॥ अं-
च्यात्॥ गतौ तु॥ अच्यात्॥ अंचिता॥ अंचिष्यति॥ आंचिष्यत्॥ आंचीत्॥ आंचिषां॥ आंचिषुः॥
आछि आयामे॥ इदित इति नुम्॥ आंछति॥ आंछेत्॥ आंछतु॥ आंछत्॥ द्वित्वं॥ नुगशामि-
ति नुक्॥ आनंछ॥ आनंछते नुग्वेति केचित्॥ आंछ॥ आंछ्यात्॥ आंछिता॥ आंछिष्यति
आंछिष्यत्॥ आंछीत्॥ हुर्छा कौटिल्ये॥ वोर्विहसे इति दीर्घः॥ हूर्छति॥ हूर्छेत्॥ हूर्छतु॥ अहू-
र्छत्॥ द्वित्वं हलादिः॥ उपानांजपचपाः॥ जुहूर्छ॥ जुहूर्छतुः॥ जुहूर्छुः॥ हूर्छ्यात्॥ हूर्छिता॥
हूर्छिष्यति॥ अहूर्छिष्यत्॥ अहूर्छीत्॥ वज गतौ॥ वजति॥ वजेत्॥ वजतु॥ अवजत्॥ श-
सददवादिगुणानां तालव्याणां नेत्वे पूर्वलोपौ च रूपयो॥ ववाज॥ ववजतुः॥ ववजुः॥ ववजिथ
ववजथुः॥ ववज॥ ववाज॥ ववजिव॥ ववजिम॥ वज्यात्॥ वजिता॥ वजिष्यति॥ अवजि-
ष्यत्॥ अवजीत्॥ अवाजीत्॥ व्रज गतौ॥ व्रजति॥ व्रजेत्॥ व्रजतु॥ अव्रजत्॥ वव्राज॥

२८

१०

वअजतुः।।अज्यात्।।अजिता।।अजिष्यति।।अअजिष्यत्।।वदिअज्योः सोनित्यंवृद्धिः।।अवा
नीत्।।अज गतौ क्षेपने च।।अजति।।अजेत्।।अजतु।।आजत्।।अजेरणपि ... वि
वक्तव्यः।।द्वित्वंधातोर्नामिन इति वृद्धिः।।विवाय।।नुधातोः।।विकरणस्य नोर्द्धातोश्चेवर्णोव
र्णयोः इयुवौ भवतः स्वरे परे।।अनेकस्वरस्य असंयोगपूर्वस्य तु यौ भवतः।।यौ बिति यत्वं
विव्यतुः।।विव्युः।।स्वरांतान्नित्यानिट् थपो वेट्।।विवयिथ।।विवेथ।।विव्यथुः।।विवाय।।विवय
विव्यिव।।विव्यिम।।य।।अनपि यकारे परे पूर्वस्य दीर्घो भवति।।वीयात्।।नेकस्वरानुदात्तः।।
एकस्वरांताद्धातोर्धातुपाठ इत्येवं पठितानां इडागमो भवति।।तत्रानुदात्ता यथा।।इदानीं
हलंतेष्वनुदात्तानुपदिशति।।अद् हद् दंतरु क्षुद्र्यकृशीयजुक्षुरुभ्यिडीश्रिभिः।।हदः हृत्रस्भ्यां
विनेकाच्स्वरांताद्धातोर्वोऽनिटः।।यत्स्यतिशकृघस्तृभ्यभलभ्यमोरमिमन्यती।।नमि
र्हनिगमां देग्धि दुस्निह्व्हु क्लिहो रुहिः।।दहिर्दिशिदृशी दंशिस्पृशिमृश्विसृसिकृशः।।लि

नँ

आ॰ चं॰

त्रिस्स्विस्यति नु प्राघ सा स्तुघ: स्तु ध्यति वुध्यती ॥ ३ ॥ क्रुधि क्रुधी व्यधि यंधि: शुष्यति पुष्य
ती श्लिषि: ॥ द्वि षद्विषी धिष्विषो त्विषतु षो शिषकृषिक षती ॥ ४ ॥ तपति प्याधि वयिस्वप्नि छु
प स्तृप्यति दृप्यती ॥ स्त्र पश्च पो क्षुपुक्षि पो स्कंदिर हादि च्छि द्भिभिदिक्षु द: ॥ अदि शदि सदि क्षिद
नु तु द: ॥ स्विद्यतीप घाति धिनर्त्ति र्शि घाति: पच्य वच यक्षि च रिवप्रच्छिरं तय: नि जि सि चि मुची भंजि
भजि ॥ भ्रस्जाति यज त्यज: ॥ युजि संजि रुजी स्वंजि स्ट जिमस्जि भुजो विजिर ॥ इमे धातवो हसां
ते ष्वनिट: ॥ नित्यनिट् धातु संग्रह: ॥ वेता ॥ वेष्यति ॥ अवेष्यत् ॥ धातोर्नीमिन: से ॥ अवेसी
त् ॥ अवेष्टां ॥ अवेषु: ॥ क्षि क्षयेगुण: ॥ क्षयति ॥ क्षयेत् ॥ क्षयतु ॥ अक्षयत् ॥ द्विश्चेति द्वि
त्वं ॥ नस्म शात्वपा: ॥ चिक्षाय ॥ चितु धातो रिताय ॥ चिक्षियतु: ॥ चिक्षियु: ॥ चिक्षयिथ ॥
चिक्षेथ ॥ चिक्षियथु: ॥ चिक्षिय ॥ चिक्षाय ॥ चिक्षियिव ॥ चिक्षियिम ॥ ये ॥ अनिपि यकारेप
रे पूर्वस्य दीर्घो भवति ॥ क्षीयात् ॥ क्षेता ॥ क्षेष्यति ॥ अक्षेष्यत् ॥ अक्षैषीत् ॥ कटेवर्षावरण

योगकदति॥ कटेत्॥ कदतु॥ अकदत्॥ द्वित्वं॥ कुहोश्चुः॥ वृद्धिः॥ चकाद॥ कद्यात्॥ कदिता
कदिष्यति॥ अकदिष्यत्॥ ह्म्यंतक्षणश्वसजागृणि श्व्येदितां सोन वृद्धिः॥ अकदीत्॥ अ
कदिष्टां॥ अकदिषुः॥ रषृवर्णक्षेणो॥ आयः॥ गुपूधूपविछिपणिपनेभ्यः स्वार्थे आयप्रत्य
योभवति॥ उपधायागुणः॥ सधातुः॥ यङादिप्रत्ययांतः शब्दो धातुसंज्ञको भवति॥
धातुत्वादप्रतिवादयः॥ अदेइत्यकारलोपः॥ गोपायति॥ गोपायेत्॥ गोपायतु॥ अगो
पायत्॥ गोपायांचकार॥ गोपायामास॥ गोपायांबभूव॥ आयादयोऽनचिवावक्तव्यः
द्वित्वं॥ कुहोश्चुः॥ जुगोप॥ जुगुपतुः॥ जुगुपुः॥ यतः॥ यकारस्यालोपोभवति अनपि विष
ये॥ गोपायात्॥ गुप्यात्॥ गोपायिता॥ उदितोवेट्॥ गोपायिता॥ गोप्ता॥ गोपायिष्यति
गोपिष्यति॥ गोप्स्यति॥ अगोपायिष्यत्॥ अगोपिष्यत्॥ अगोप्स्यत्॥ अगोपायीत्
अगोपीत्॥ अनिटोनामिवतः॥ अगोप्सीत्॥ अगोप्तां॥ कृसादितिसिलोपः॥ अगो

12

आ० ४०

पुः॥ एवं धूपसंतापे॥ धूपायतीत्यादि॥ तप संतापे॥ तपति॥ तेपे॥ तपतु॥ अतपत्॥ ततापा॥ तेप
तुः॥ धातोर्नित्यानि त्ययोर्वेट्थपि॥ तेपिथ॥ ततप्थ॥ तप्यात्॥ तप्ता॥ तप्स्यति॥ अत॰॰प्स्यत्
अताप्सीत्॥ क्रमु पादविक्षेपे॥ क्रमु न्क्रमु भ्रमु त्रसि त्रुटि लष भ्रास भ्लास श्वा पप्रत्ययो वत्स्य:
चतुर्षु तिबादिषु परेषु॥ अपोपवादः॥ क्रम्यति॥ क्रम्यतः॥ क्रम्यंति॥ क्रमे ष्ये दीर्घता वक्तव्या॥
क्रामति॥ क्रामेत्॥ क्रामतु॥ अक्रामत्॥ द्वित्वं॥ कुहोश्चुः॥ चक्राम॥ चक्रमतुः॥ चक्रमुः॥ क्रम्या
त्॥ क्रमिता॥ क्रमिष्यति॥ अक्रमिष्यत्॥ अक्रमीत्॥ अक्रमिष्टां॥ अक्रमिषुः॥ यम उपर
मे॥ उपरमो निवृत्तिः॥ गमां छः गमयमइषूनां छोंतादेशो भवति॥ चतुर्षु परेषु॥ यछति
यछेत्॥ यछतु॥ अयछत्॥ द्वित्वं॥ ययाम॥ येमतुः॥ येमुः॥ येमिथ॥ ययंथ॥ येमथुः॥
येम॥ ययाम॥ येमिव॥ येमिम॥ यम्यात्॥ यंता॥ यंस्यति॥ अयंसीत्॥ अयंसिष्टां॥ अयं
सिषुः॥ नम प्रह्वत्वे शब्दे॥ नमति॥ नमेत्॥ नमतु॥ अनमत्॥ अनमतां॥ ननाम॥ नेमतुः॥

यमिरम्बिनमातांसक्ष्मारिटपेर॥

नेमुः॥ नेमिथ॥ ननंथ॥ नेमथुः॥ नेम॥ ननाम॥ ननम॥ नेमिव॥ नेमिम॥ नम्यात्॥ नंता॥ नंस्य
ति॥ अनंस्यत्॥ अनंसीत्॥ अनंसिष्टां॥ अनंसिषुः॥ गम्लृ गतौ॥ गछति॥ गछेत्॥ गछ
तु॥ अगछत्॥ द्वित्वं॥ कुहोश्चुः॥ अत उपधाया इति वृद्धिः॥ जगाम॥ गमां स्वरे॥ गम हन जन
खन घस इत्येतेषामुपधायाकारस्य लोपो भवति। क्ङिति ङिति परे॥ न त्वङि॥ जग्मतुः
जग्मुः॥ जग्मिथ॥ जगंथ॥ जग्मथुः॥ जग्म॥ जगाम॥ जगम॥ जग्मिव॥ जग्मिम॥ गम्यात्
गंता॥ हन्गमस्य [illegible] पू॥ हंते अकारांतात् अमेश्चोपस्य पइड् आगमो भवति॥ गमिष्यति॥ अग
मिष्यत्॥ लितृषादेर्ङः॥ लितो धातोः पुषादेश्चाङ् प्रत्ययो भवति॥ दिवादौ परे परस्मैपदे
सेरपवादः॥ अङि इत्युक्तेनोपधालोपः॥ अगमत्॥ अगमतां॥ अगमन्॥ अगमः॥
अगमतं॥ अगमत॥ अगमं॥ अगमाव॥ अगमाम॥ इषु इच्छायां॥ इछति॥ इछेत्॥
इछतु॥ ऐछत्॥ द्वित्वं॥ उपधाया लघोरिति गुणः॥ असवर्णे स्वरे॥ इवर्णोकारोकारयो

13

आ॰ नं॰

रियुवोर्भवतः॥ असवर्णे स्वरे परे॥ इयेष॥ ईषतुः॥ ईषुः॥ इयेषिथ॥ ईषथुः॥ ईष॥ इयेष॥ ई
षिव॥ ईषिम॥ इष्यात्॥ इषुसहलुभरुषरिषामनयितस्मोऽन्ववक्तव्यः॥ उपधागुणः॥ एषि
ता॥ एष्टा॥ एषिष्यति॥ एषिष्यत्॥ एषीत्॥ ऐषिष्टां॥ ऐषिषुः॥ ञि फला विशरणे॥ विश
रणं मारणं॥ फलति॥ फलेत्॥ फलतु॥ अफलत्॥ द्वित्वं॥ रुपानां जवचपाः॥ पफाल॥ आ
देशादि द्वित्वेनेत्वपूर्वलोपनिषेधप्राप्ते॥ तॄफलभजत्रपांक्कितिणादौ सेटि थपि चेत्वपूर्वलो
पौ वक्तव्यौ॥ फेलतुः॥ फेलुः॥ फेलिथ॥ फेलथुः॥ फेल॥ पफाल॥ पफल॥ फेलिव॥ फेलिम॥ फ
ल्यात्॥ फलिता॥ फलिष्यति॥ अफलिष्यत्॥ अकारोपधत्वेन वृद्धिविकल्पे प्राप्ते॥ ल्वीत
स्याकारस्य सेनित्यं वृद्धिर्वाच्या॥ अफालीत्॥ जि जये॥ गुणः॥ अयादेशः॥ जयति
जयेत्॥ जेस्तवन्तो स्ति वन्ती वक्त...॥ जयतेरणविधानात् द्वित्वं न भवति॥ जयति॥ ज
यतां॥ ... जयंति॥ अजयत्॥ सपरोक्षयोर्जेर्गिः॥ जिगाय॥ जिग्यतुः॥ जिग्युः॥ जिगयि

थ॥ जिगेथ॥ जिग्यथुः॥ जिग्य॥ जिगाय॥ जिगय॥ जिग्यिव॥ जिग्यिम॥ ये इति दीर्घः॥ जी
यात्॥ जेता॥ जेष्यति॥ अजेष्यत्॥ अजैषीत्॥ अजेषिष्टां॥ अजैषुः॥ कृष विलेखने॥ विलेखनं
आकर्षणं॥ कर्षति॥ कर्षेत्॥ कर्षतु॥ अकर्षत्॥ द्वित्वादि:॥ कुहोश्चुः॥ चकर्ष॥ उपधाया लघो
रिति गुणः॥ चकृषतुः॥ चकृषुः॥ चकर्षिथ॥ गुणे कृते॥ चकर्ष रलयोः सेट्र्शां॥ इश्मकृष मृ
श स्पृश तृप दृप सृपा कृसे परे ऋकारस्य रो भवति॥ कृत्वं॥ क्रष्टा॥ कृषादीनां रो वा वक्तव्यः॥
क्रष्टा॥ क्रक्ष्यति॥ कर्क्ष्यति॥ अक्रक्ष्यत्॥ अकर्क्ष्यत्॥ रादेशे कृते वृद्धिः॥ अक्राक्षीत्॥ अनिटो
नामिवत् इति वृद्धिः॥ अकार्क्षीत्॥ कृषादीनां सिर्वा वक्तव्यः॥ ततः क्षो हसपांतात् सक्॥ इका
रांतात् सकारांतात् षकारांतात् नाम्युपधादवि घमोटो दिवादिपरतः सक् प्रत्ययो भवति॥ इशं
वर्जयित्वा सेरपवादः॥ अकृक्षत्॥ अकृक्षातां॥ अकृक्षन्॥ रुष रिष हिंसायां॥ उपधाया ल
घोरिति गुणः॥ रोषति॥ रोषेत्॥ रोषतु॥ अरोषत्॥ रुरोष॥ रुरुषतुः॥ रुरुषुः॥ रुरोषिथ॥

इषसहक्लुभरुषरिषांश्च नयितसेटवाभवति

रुरुषथुः॥ रूरुष॥ रुष्यात्॥ रोषिता। रोष्टा॥ रोषिष्यति॥ अरोषिष्यत्॥ अरोषीत्॥ उष दाहे॥ गुणः
ओषति॥ ओषेत्॥ ओषतु॥ औषत्॥ उषविद्जागृनामामन्त्रवायत्स्यः॥ ओषांचकार॥ उवोष
उष्यात्॥ ओषिता॥ ओषिष्यति॥ औषिष्यत्॥ औषीत्॥ मिह सेचने॥ मेहति॥ मेहेत्॥ मेहतु॥ अमे
हत्॥ मिमेह॥ मिह्यात्॥ होढः॥ तथोर्धः॥ ढत्वं॥ ढिढोलोपोदीर्घश्च॥ ढकारस्यढकारेपरे लोपो भ
वति पूर्वस्य च दीर्घः॥ मेढा॥ मेक्ष्यति॥ अमेक्ष्यत्॥ हसषांतात्क्सः॥ होढः॥ षढोःकः से॥ धातोःष
कारढकारयोःकत्वंभवतिसकारेपरे॥ अमिक्षत्॥ अमिक्षतां॥ अमिक्षन्॥ दहभस्मीकरणे॥
दहति॥ दहेत्॥ दहतु॥ अदहत्॥ द्वित्वं॥ द्विः॥ ददाह॥ देहतुः॥ देहुः॥ देहिथ॥ ददग्ध॥ दह्या
त्॥ दग्धा॥ दादेर्घः॥ आदिजबानांदभातस्यदभान्भोः॥ खसेचपानामितिघस्यकत्वं॥ धकिला
त्वःसः॥ धक्ष्यति॥ अधक्ष्यत्॥ अधाक्षीत्॥ क्सात्॥ क्सादुत्तरस्यभ्क्सेपरेसेर्लोपोभवति
अदाग्धां॥ अधाक्षुः॥ ग्लैम्लैहर्षक्षये॥ आयादेशः॥ ग्लायति॥ ग्लायेत्॥ ग्लायत्॥ ग्लायतु

कसा३.

अग्लायत् ॥ संध्यक्षराणामा ॥ संध्यक्षराणामात्वं भवति अनपि विषये ॥ एप्रह्रस्वः ॥ एर्वस्य ह्रस्वा
दिशेषः ॥ कुहोश्चुः ॥ आतो णप डौ ॥ अकारांताद्धातोः परे णप् डौ भवति ॥ डित्वाट्टिलोपः ॥ जग्लौ ॥ आ
तोऽनपि ॥ धातोराकारस्य लोपो भवति ॥ अनपि क्ङिति ङिति स्वरे परे ॥ सेटि क्ङपि च ॥ जग्लतुः ॥ जग्लुः
जग्लिथ ॥ जग्लाथ ॥ जग्लथुः ॥ जग्ल ॥ जग्लौ ॥ जग्लिव ॥ जग्लिम ॥ संयोगादेरादंतस्य क्ङितियादे
वेकारो वा वक्तव्यः ॥ ग्लायात् ॥ ग्लेयात् ॥ ग्लाता ॥ ग्लास्यति ॥ अग्लास्यत् ॥ अग्लासीत् ॥ अग्ला
सिष्टां ॥ अग्लासिषुः ॥ गै शब्दे ॥ गायति ॥ गायेत् ॥ गायतु ॥ अगायत् ॥ जगौ ॥ दादेरे ॥ अपित् दा
ध्यामांगे ङाकुपिवति शास्थानां मा कारस्य एकारो भवति ॥ आशीर्पादादौ परस्मैपदे परे ॥ गेयात् ॥
गाता ॥ गास्यति ॥ अगास्यत् ॥ अगासीत् ॥ ष्ठै शब्दसंघातयोः ॥ सत्वनिषेधः ॥ ष्ठायति ॥ संध्य
क्षराणामा ॥ नशसात्वपाः ॥ षात्टवर्गस्तवर्गजट्ठतिषकारे नकार एव ॥ तष्ठौ ॥ ष्ठेयात् ॥ ष्ठायात्
ष्ठाता ॥ ष्ठास्यति ॥ अष्ठास्यत् ॥ अष्ठासीत् ॥ दैप शोधने ॥ पट्टत् ॥ दायति ॥ दायेत् ॥ दायतु

॥ मेरातोद्विदश्चोन्तरस्यअनुउस्भवति ७५ ॥

अदायत् ॥ ददौ ॥ ददतुः ॥ ददुः ॥ पित्वादेकाराभावः ॥ दायात् ॥ दाता ॥ दास्यति ॥ अदास्यत् ॥ अदासीत् ॥ पित्वात्सिलोपाभावः ॥ धेट पाने ॥ टई वर्थः ॥ धयति ॥ धयेत् ॥ धयतु ॥ अधयत् ॥ द्वित्वंह्रस्वः ॥ भ्रूपानांजवचपाः ॥ आतोणपश्चौ ॥ दधौ ॥ दधतुः ॥ दधुः ॥ धेयात् ॥ धाता ॥ धास्यति ॥ अधास्यत् ॥ सा घ्रा ध्मा शा धे ह्रां वा सिलोपः ॥ अधासीत् ॥ अधासिष्टां ॥ अधासिषुः ॥ अधात् ॥ अधातां ॥ स्याद्विदः ॥ उस्यालोपः ॥ उसिपरे धातोराकारस्यलोपोभवति ॥ अधुः ॥ अधाः ॥ अधातं अधात ॥ अधां ॥ अधाव ॥ अधाम ॥ दृशिर् प्रेक्षणे ॥ दृशादेः पश्यादिः ॥ दृशादेर्धातोः पश्यादिरादेशोभवति ॥ तिवादिषु चतुर्षु परेषु ॥ दृश अर्त्ति सदशदपा घ्रा ध्मा स्थाम्नादानएते दृशादयः पश्य ऋच्छ धौ शीय सीद पिब जिघ्र धम तिष्ठ मन यछ एते पश्यादयः ॥ पश्यति ॥ पश्यतः ॥ पश्यंति पश्येत् ॥ पश्यतु ॥ अपश्यत् ॥ द्वित्वं ॥ रः ॥ उपधायागुणः ॥ ददर्श ॥ ददृशतुः ॥ ददृशुः ॥ सृजिदृशोस्थपिवेट् ॥ ददर्शिथ ॥ गुणः ॥ अरोमृसे दृशां ॥ षत्वं ष्टुत्वं ॥ दद्रष्ठ ॥ ददृशथुः ॥ ददृश ॥ ददर्श

ददृशिव ॥ ददृशिम ॥ दृश्यात् ॥ द्रष्टा ॥ द्रक्ष्यति ॥ अद्रक्ष्यत् ॥ अतउपधाया इति दीर्घः ॥ अद्रा
क्षीत् ॥ हसात् इत्वं ॥ अद्राष्टां ॥ अद्राक्षुः ॥ अद्राक्षीः ॥ अद्राष्टं ॥ अद्राष्ट ॥ अद्राक्षं ॥ अद्राक्ष्व ॥
अद्राक्ष्म ॥ पक्षे इरितो वेति ॥ अदृत् ॥ ऋदृशोऽङि गुणः ॥ अदर्शत् ॥ अदर्शतां ॥ अदर्शन् ॥ ऋ
गतौ ॥ ऋच्छादेशः ॥ ऋच्छति ॥ ऋच्छेत् ॥ ऋच्छतु ॥ आर्छत् ॥ रः ॥ वृद्धिः ॥ आर ॥ आरतुः ॥ आरुः
अत्यर्तिव्ययतीनां थपि नित्यमिट् ॥ आरिथ ॥ गुणोर्ति संयोगाद्योः ॥ अर्तेः संयोगादेश्च ऋदंत
स्य च गुणो भवति ॥ यकि यङि क्ङिति ला दावाशीर्या दादौ च ॥ अर्यति ॥ अर्त्ता ॥ हन्तृगमस्य पः ॥
अरिष्यति ॥ आरिष्यत् ॥ लिङ्घादेईः ॥ आरत् ॥ आरतां ॥ आरन् ॥ ऋस्मृध्यामइत्येतिके वि
त् ॥ आर्षीत् ॥ सृ गतौ ॥ धावादेशः ॥ धावति शीघ्रगतावेव धावादेशः ॥ अन्यत्र सरति ॥ धा ॥ श्री ॥ ०॥
वेत् ॥ धावतु ॥ अधावत् ॥ द्वित्वं ॥ रः ॥ वृद्धिः ॥ ससार ॥ सस्रतुः ॥ सस्रुः ॥ ससर्थ ॥ सस्रथुः
सस्र ॥ ससार ॥ सस्व ॥ सस्म ॥ पादादौ परस्मैपदे परे ऋकारस्य रिङादेशो वक्तव्यः ॥ इक्का

रव्यवधानार्थः॥ तेतयेडूतिनदीर्घः॥ स्त्रियात्॥ स्त्रियास्तां॥ स्त्रियासुः॥ सर्त्ता॥ सरिष्यति॥ अ
सरिष्यत्॥ पुषादित्वात्ङः॥ असरत्॥ असार्षीत्॥ शङ्सातने॥ शीयादेशः॥ शीयादेशे आ
त्मनेपदंचाच्यं॥ शीयते॥ शीयेते॥ शीयंते॥ शीयेत॥ शीयेयातां॥ शीयेरन्॥ शीयतां॥ शीये
तां॥ शीयंतां॥ अशीयत॥ अशीयेतां॥ अशीयंत॥ द्वित्वं॥ वृद्धिः॥ शशाद॥ लोपःपचां कित्येना
स्य॥ शेदतुः॥ शेदुः॥ शेदिथ॥ शशत्थ॥ शद्यात्॥ शत्ता॥ शत्स्यति॥ अशत्स्यत्॥ लिदित्वात
ङः॥ अशदत्॥ षद्लृविशरणगत्यवसादनेषु॥ सत्वं सीदादेशः॥ सीदति॥ सीदेत्॥ सीदतु॥
असीदत्॥ द्वित्वं वृद्धिः॥ ससाद॥ सेदतुः॥ सेदुः॥ सेदिथ॥ ससत्थ॥ सद्यात्॥ सत्ता॥ सत्स्य
ति॥ असत्स्यत्॥ लिदित्वाङः॥ असदत्॥ पापाने पिबादेशः॥ पिबति॥ पिबेत्॥ पिबतु॥ अ
पिबत्॥ द्वित्वं ह्रस्वः॥ आतो लोपइटि लोपः॥ पपौ॥ पपतुः॥ पपुः॥ पपिथ॥ पपाथ॥ पपथुः
पप॥ पपौ॥ पपिव॥ पपिम॥ दोदेर॥ पेयात्॥ पाता॥ पास्यति॥ अपास्यत्॥ दादेष्वेइति सिलौ

पः॥ अपात्॥ घ्रागंधोपादाने॥ छजिघ्रादेशः॥ जिघ्रति॥ जिघ्रेत्॥ जिघ्रतु॥ अजिघ्रत्॥ द्वित्वं॥ कुहोश्चुः
रुपानांजयचचपाः॥ इतिजकारः॥ जघ्रौ॥ जघ्रतुः॥ जघ्रुः॥ घ्रेयात्॥ घ्रायात्॥ घ्राता॥ घ्रास्यति॥ अ
घ्रास्यत्॥ अघ्रासीत्॥ अघ्रात्॥ ध्माशब्दाग्निसंयोगयोः॥ धमादेशः॥ धमति॥ धमेत्॥ धमतु
अधमत्॥ द्वित्वं॥ इपानांजयचपाः॥ इतिदकारः॥ आतोणल् औ॥ दध्मौ॥ दध्मतुः॥ दध्मुः॥ ध्मेया
त्॥ ध्मायात्॥ ध्माता॥ ध्मास्यति॥ अध्मास्यत्॥ अध्मासीत्॥ अध्मासिष्टां॥ अध्मासिषुः॥
ष्ठागतिनिवृत्तौ॥ आदेस्सः॥ इतिसकारेकृतेनिमित्ताभावे ठस्यथः॥ तिष्ठादेशः॥ तिष्ठति॥
तिष्ठेत्॥ तिष्ठतु॥ अतिष्ठत्॥ नशशात्खपाः॥ तस्थौ॥ तस्थतुः॥ तस्थुः॥ स्थेयात्॥ स्थाता॥ स्था
स्यति॥ अस्थास्यत्॥ अस्थात्॥ निष्पूर्वःषत्वं॥ न्यष्ठात्॥ म्नाअभ्यासे॥ मनादेशः॥ मनति॥ म
नेत्॥ मनतु॥ अमनत्॥ मम्नौ॥ मम्नतुः॥ मम्नुः॥ मम्निथ॥ मम्नाथ॥ म्नायात्॥ म्नेयात्॥
म्नाता॥ म्नास्यति॥ अम्नास्यत्॥ अम्नासीत्॥ दाणदाने॥ यच्छादेशः॥ यच्छति॥ यच्छेत्॥ यच्छतु

श्रीः

अयच्छत्॥ददौ॥ददतुः॥ददुः॥ददिथ॥ददाथ॥देयात्॥दाता॥दास्यति॥अदास्यत्॥अदात्॥
हृञ्कौटिल्ये॥ह्वरति॥ह्वरेत्॥ह्वरतु॥अह्वरत्॥जह्वार॥जह्वरतुः॥जह्वरुः॥अदंतस्यथपिने
ट्॥जह्वर्थ॥जह्वरथुः॥जह्वर॥जह्वार॥जह्वरिव॥जह्वरिम॥ह्वर्यात्॥ह्वर्त्ता॥हगन्तमःस्यप्रः
ह्वरिष्यति॥अह्वरिष्यत्॥वृद्धिः॥अह्वार्षीत्॥अह्वार्ष्टां॥अह्वार्षुः॥स्कंदिरगतिशोषणयोः॥
स्कंदति॥स्कंदेत्॥स्कंदतु॥अस्कंदत्॥नश्शात्वपाः॥कुहोश्चुः॥चस्कंदा॥चस्कंदतु॥चस्कं
दुः॥चस्कंदिथ॥हसात्॥हसस्यसवर्णेहसेपरेलोपोभवति॥चस्कंथ॥नोलोपः॥स्कद्यात्
स्कंत्ता॥स्कंत्स्यति॥अस्कंत्स्यत्॥सायनिरोवृद्धिः॥अस्कांत्सीत्॥इरितोवा॥अस्कंदत्
तृप्लवनतरणयोः॥तरति॥तरेत्॥तरतु॥अतरत्॥धातोर्नामिनः॥ततार॥क्वित्वाभावा
द्गुणः॥असंयोगात्रणादरवित्त्वंवाच्यं॥तृफलभजत्रपामित्येत्वपूर्वलोपौ॥तेरतुः॥तेरुः॥ते
रिथ॥तेरथुः॥तेर॥ततार॥तेरिव॥तेरिम॥ऋतइर्॥ऋकारस्यइर्भवति॥क्विति ङिति च

परे॥ य्वोर्विहसे इति दीर्घः॥ तीर्यात्॥ इट्योग्रहां॥ ग्रहादीनामिट ईकारो भवति॥ णादिं विनाद्वेङ-
हस्त॥ अदंतानां वा॥ तरिता॥ तरीता॥ तरिष्यति॥ तरीष्यति॥ अतरिष्यत्॥ अतरीष्यत्॥ सावनि-
योन दीर्घः॥ अतारीत्॥ अतारिष्टां॥ अतारिषुः॥ रंज रागे॥ अपि रंज दंश षंज स्वंजां॥ एषामनु-
स्वारस्य लोपो भवति अपि परे॥ रजति रजेत्॥ रजतु॥ अरजत्॥ ररंज॥ ररजतु॥ ररंजतु॥ ररं-
जुः॥ ररंजिथ॥ ररंक्थ॥ रज्यात्॥ रंक्ता॥ रंक्ष्यति॥ अरंक्ष्यत्॥ अरांक्षीत्॥ अररंक्ता॥ अरंक्षा-
तां॥ अरंक्षत॥ चोकुः॥ रचसेच पाश्कसानां षत्वं॥ कषसंयोगे क्षः॥ दंश दंशने॥ दशति॥ दशेत्॥
दशतु॥ अदशत्॥ ददंश॥ ददंशतुः॥ दंश्यात्॥ षत्वं कुत्वं॥ दंष्टा॥ दंक्ष्यति॥ अदंक्ष्यत्॥ अदां-
क्षीत्॥ अदांष्टां॥ अदांक्षुः॥ षंज संगे॥ षत्वं॥ सजति॥ सजेत्॥ सजतु॥ असजत्॥ ससंज॥
ससंजतुः॥ ससंजुः॥ सज्यात्॥ संक्ता॥ संक्ष्यति॥ असंक्ष्यत्॥ असांक्षीत्॥ असांक्तां॥ असां-
क्षुः॥ चितनिवासे रोगापनयने च॥ उभयः॥ गुपतिजकितमानवधदानशानेभ्यः स्वार्थे स-

प्रत्ययो भवति ॥ चातोभ्यद्विर्वचनं ॥ कृतोस्तु ॥ सघातुः ॥ चातुत्वादपतिवादयः ॥ अदेड्इतिसका
रस्याकारलोपः ॥ चिकित्सति ॥ चिकित्सेत् ॥ चिकित्सतुः ॥ अचिकित्सत् ॥ कासप्रत्ययादामहस
न्त्परः ॥ चिकित्सांचकार ॥ चिकित्सामास ॥ चिकित्सांबभूव ॥ यत इत्यकारलोपः ॥ चिकित्स्या
त् ॥ चिकित्सिता ॥ चिकित्सिष्यति ॥ अचिकित्सिष्यत् ॥ अचिकित्सीत् ॥ पत्लृ पतने ॥ पतति ॥ प
तेत् ॥ पततु ॥ अपतत् ॥ इत्यंहृह्विः ॥ पपात ॥ पपततु ॥ पपतुः ॥ पत्यात् ॥ पतिता ॥ पतिष्यति ॥
अपतिष्यत् ॥ लित्पुषादेर्ङः ॥ पतेर्ङे पुमागमो भवति ॥ अपप्तत् ॥ भ्रमु चलने ॥ भ्रमति ॥ भ्रमेत् ॥
भ्रमतु ॥ अभ्रमत् ॥ कसुभ्रमु यप्रत्ययो वा ॥ शमामिति दीर्घो भवति ॥ भ्राम्यति ॥ भ्राम्येत् ॥
भ्राम्यतु ॥ अभ्राम्यत् ॥ बभ्राम ॥ फलादीनां राजभ्रमुत्रसां एत्वपूर्वलोपौ वक्तव्यौ ॥ भ्रेमतुः
भ्रेमुः ॥ बभ्रमतुः ॥ बभ्रमुः ॥ भ्रम्यात् ॥ भ्रमिता ॥ भ्रमिष्यति ॥ अभ्रमिष्यत् ॥ अभ्रमीत्
टुवम उद्गिरणे ॥ टुइत्संज्ञकः ॥ वमति ॥ वमेत् ॥ वमतु ॥ अवमत् ॥ ववाम ॥ वम एत्वपूर्व

लोपोवस्त्वयोः ॥ वेमतुः ॥ ववमतुः ॥ वेमुः ॥ ववमुः ॥ वम्यात् ॥ वमिता ॥ वमिष्यति ॥ अवमिष्यत् ॥
अवमीत् ॥ फलगतौ ॥ फलति ॥ फलेत् ॥ फलतु ॥ अफलत् ॥ पफाल ॥ फेलतुः ॥ पफलतुः ॥ फल्या
त् ॥ फलिता ॥ फलिष्यति ॥ अफलिष्यत् ॥ अफालीत् ॥ स्वन शब्दे ॥ स्वनति ॥ स्वनेत् ॥ स्वनतु ॥ अ
स्वनत् ॥ सस्वान ॥ सस्वनतुः ॥ सस्वान्नः ॥ स्वेनुः ॥ सस्वनुः ॥ स्वन्यात् ॥ स्वनिता ॥ स्वनिष्यति
अस्वनिष्यत् ॥ अस्वानीत् ॥ वस निवासे ॥ वसति ॥ वसेत् ॥ वसतु ॥ अवसत् ॥ वस णप्र इ
ति स्थिते ॥ द्विश्चेति द्वित्वं न वादौ पूर्वस्य ॥ न वादौ परे यजादीनां ग्रहादीनां च पूर्वस्य संप्रसा
रणं भवति ॥ सस्वरस्य यकार रेफानां इकारोकार ऋकाराः संप्रसारणं दीर्घस्य दीर्घं ह्रस्व
स्य ह्रस्वं ॥ ग्रहिज्या वयिव्यधि वष्टि विचति वृश्चति स्तथा ॥ पृच्छति भृज्जति श्चैव न वेते तु यजा
दयः ॥ यजि वपि वहि श्चैव वेञ् व्येञो ह्वयति स्वपि वदि वशो श्वयति र्वसिति रेकादश यजादयः
पूर्वस्य वकारस्योत्वे कृते ॥ अत उपधाया इति वृद्धिः ॥ उवास ॥ उवस ॥ अतुस इति स्थिते ॥

यजां यवराणां स्यतः संप्रसारणं क्किति॥ यजादीनां संप्रसारणं भवति॥ क्किति परे॥ सवर्णे दीर्घः सह॥
शसादेः षः॥ घसिसासिवसीनां सस्य षो भवति॥ षत्वनिमित्ते सति॥ ऊषतुः॥ ऊषुः॥ उवसिथ॥
उवस्थ॥ ऊषथुः॥ ऊष॥ उवास॥ उवस॥ ऊषिव॥ ऊषिम॥ संप्रसारणं॥ उष्यात्॥ वस्ता॥ सस्तोन
पि॥ सकारस्य तो भवति॥ अन्नपि विषये॥ वत्स्यति॥ अवत्स्यत्॥ वृद्धिः॥ अवात्सीत्॥ हसात्॥ प्रत्य
यलोपे प्रत्ययलोपलक्षणमिति न्यायात्॥ सस्य तः॥ अवात्तां॥ अवात्सुः॥ वदव्यक्तायां वाचि॥
वदति॥ वदेत्॥ वदतु॥ अवदत्॥ उवाद॥ ऊदतुः॥ ऊदुः॥ उवदिथ॥ ऊदथुः॥ ऊद॥ उवाद॥ उवद॥
ऊदिव॥ ऊदिम॥ उद्यात्॥ वदिता॥ वदिष्यति॥ अवदिष्यत्॥ अवादीत्॥ टुओश्वि गतिवृद्ध्योः॥
टुओकारौ कार्यार्थौ॥ श्वयति॥ श्वयेत्॥ श्वयतु॥ अश्वयत्॥ श्वयतेर्लिटि प्रथमं संप्रसारणं
वाच्यं॥ ततो द्वित्वं॥ शुशाव॥ शुशुवतुः॥ शुशुवुः॥ पक्षे॥ शिश्वाय॥ शिश्वियतुः॥ शिश्वियुः॥ श्व
यतेः क्किति संप्रसारणं वाच्यं॥ यजादित्वात् संप्रसारणे ये इति दीर्घः॥ शूयात्॥ श्वयिता॥ श्वयिष्य

ति॥ अश्वयिष्यत्॥ श्वयतेः सोवृद्धिभावो वाच्यः॥ अश्वयीत्॥ श्वयतेरिलोपोङि वक्तव्यः॥ अश्व
त्॥ अश्वतां॥ अश्वन्॥ श्वयतेपङु द्वित्वं सेरपवादः॥ पक्षे पूर्वस्य ह्रस्वादिशेषः॥ [illegible] नुधातोः॥ अ
शिश्वियत्॥ अशिश्वियतां॥ अशिश्वियन्॥ इत्यादि॥ ः॥ इति परस्मैपदप्रक्रिया समाप्ता॥ ॐ॥
अथात्मनेपदप्रक्रिया॥ एधं वृद्धौ॥ अकार आत्मनेपदार्थः॥ ते प्रभृतीनि नव वचनानि योज्या
नि॥ अपकर्त्तरीत्यप्॥ एधते॥ आदाथई॥ अइए॥ एधेते॥ अदे इत्यकारलोपः॥ एधंते॥ धर्म
दे घते॥ अदोरात्यं इत्यादि॥ विधो ईतादीनि पराणि नव वचनानि योज्यानि॥ एधेत॥ एधे
यातां॥ एधेरन्॥ धर्मतः साधुरेधेत॥ आशीः प्रेरणयोः तामादयः॥ एधतां॥ एधेयातां
एधंतां॥ अनद्यतनेऽतीते॥ तनादयः॥ दिवादावट्॥ स्वरादेः [illegible] ॥ ऐधत॥ ऐधेतां॥ ऐधं
त॥ परोक्षे॥ एप्रभृतीनि नव वचनानि कासादिप्रत्ययादाम् कृ सभू परः॥ एधांचक्रे॥
एधांचक्राते॥ एधांचक्रिरे॥ भ्वसोर्नात्मनेपदं॥ एधामास॥ एधांबभूव॥ एधिषीष्ट॥

एधिता॥एधिष्यते॥ऐधिष्यत॥एधिषी॥ऐधिषातां॥ऐधिषत॥ईक्ष दर्शनांकयोः॥ईक्षे
ईक्षेत॥ईक्षतां॥दिवादावद्रूस्वरे देः॥ऐक्षत॥ऐक्षेतां॥ऐक्षंत॥कासादिप्रत्ययादाम क्रे
सम्र पर॥ईक्षांचक्रे॥ईक्षामास॥ईक्षांबभूव॥ईक्षिषीष्ट॥ईक्षिता॥ईक्षिष्यति॥ऐक्षि
ष्यत॥ऐक्षिष्ट॥ऐक्षिषातां॥ऐक्षिषत॥दद दाने॥ददते॥ददेत॥ददतां॥अददत॥एत्व
पूर्वलोपाभावः॥दददे॥दददाते॥दददिरे॥ददिषीष्ट॥ददिता॥ददिष्यते॥अददिष्यत॥
अददिष्ट॥अददिषातां॥अददिषत॥ष्वष्क गतौ॥सत्वाभावः॥ष्वष्कते॥ष्वष्केत॥ष्वष्कतां
अष्वष्कत॥षष्वष्के॥ष्वष्किषीष्ट॥ष्वष्किता॥ष्वष्किष्यते॥अष्वष्किष्यत॥अष्वष्किष्ट॥ऋज
गतौस्थैर्ये च॥उपधायालघोः॥अर्जते॥अर्जेत॥अर्जतां॥आर्जत॥नगशाम्मितिनुक्॥
आनृजे॥आनृजाते॥आनृजिरे॥अर्जिषीष्ट॥अर्जिता॥अर्जिष्यते॥आर्जिष्यत॥आ
र्जिष्ट॥ष्वंज परिष्वंगे॥परिष्वंग आलिंगनं॥अपि रंज दंश ष्वंज षंजां॥स्वजते॥स्वजेत॥

स्वजतां॥ अस्वजत॥ सस्वंजे वा द्वित्वं॥ सस्वजे सस्वं॥ स्वङ्क्षीष्ट॥ स्वंक्ता॥ स्वंक्ष्यते॥ अस्वंक्षत॥
अस्वंक्त॥ अस्वंक्षातां॥ अस्वंक्षत॥ त्रप लज्जायां॥ उकार वकारौ कार्यार्थौ॥ त्रपते॥ त्रेपते॥ त्रप
तां॥ अत्रपत॥ तत् फलेत्येव एत्वलोपौ॥ त्रेपे॥ त्रेपाते॥ त्रेपिरे॥ त्रपिषीष्ट॥ त्रप्सीष्ट॥ त्रप्ता॥ त्रपिता
त्रपिष्यते॥ त्रप्स्यते॥ अत्रपिष्यत॥ अत्रप्स्यत॥ अत्रपिष्ट॥ अत्रप्त॥ तिज निशाने क्षमायां च
निशानं तीक्ष्णीकरणं॥ गुप्तिज्भ्यः॥ तितिक्षते॥ तितिक्षेत॥ तितिक्षतां॥ अतितिक्षत॥ कासादि
त्वादाम्॥ तितिक्षांचक्रे॥ तितिक्षामास॥ तितिक्षांबभूव॥ तितिक्षिषीष्ट॥ तितिक्षिता॥ ति
तिक्षिष्यते॥ अतितिक्षिष्यत॥ अतितिक्षिष्ट॥ गुप गोपनकुत्सनयोः॥ जुगुप्सते॥ जु
गुप्सेत॥ जुगुप्सतां॥ अजुगुप्सत॥ जुगुप्सांचक्रे॥ जुगुप्सामास॥ जुगुप्सांबभूव॥ जुगुप्सि
षीष्ट॥ जुगुप्सिता॥ जुगुप्सिष्यते॥ अजुगुप्सिष्यत॥ अजुगुप्सिष्ट॥ मानविचारणे क्षमा
यां च॥ गुप्तिज्भ्य इति सप्रत्ययः॥ द्वित्वं॥ ह्रस्वः॥ यः से॥ अकारः पूर्व इकारो भवति सपरे

21

मानादीनां पूर्वस्य दीर्घो वक्तव्यः॥ मीमांसते॥ मीमांसत॥ अमीमांसत॥ मीमांसांचक्रे॥ मीमांसामा
स॥ मीमांसांबभूव॥ मीमांसिषीष्ट॥ मीमांसिता॥ मिमांसिष्यते॥ अमीमांसिष्यत॥ अमीमांसि
ष्ट॥ वधुनिंदायां॥ आदिजबानामिति वकारस्य भकारः॥ खसेश्च पा दसानामिति धकारस्य तकारः
बीभत्सते॥ बीभत्सेत॥ बीभत्सतां॥ बीभत्सत॥ बीभत्सांचक्रे॥ बीभत्सामास॥ बीभत्सांबभूव॥ बी
भत्सिषीष्ट॥ (बीभत्सिषीष्ट)॥ बीभत्सिता)॥ बीभत्सिता॥ बीभत्सिष्यते॥ अबीभत्सिष्यत॥ अबीभ
त्सिष्ट॥ पण व्यवहारे स्तुतौ च पन च॥ आयः॥ पणेस्तुतौ आयप्रत्ययो भवति॥ पणायते॥ व्यवहा
रेतु शतस्य पणते॥ पणायेत॥ पणायतां॥ पणायत॥ पणायांचक्रे॥ पणायामास॥ पणायांबभूव
आयादय आर्द्धधातुके वा भवंति॥ आयाभावपक्षे॥ पेणे॥ पणाते॥ पेणिरे॥ पणायिषीष्ट॥ पणि
षीष्ट॥ पणायिता॥ पणिता॥ पणायिष्यते॥ पणिष्यते॥ अपणायिष्यत॥ अपणिष्यत॥ अपणायिष्ट
अपणिष्ट॥ आयप्रत्ययांतात्परस्मैपदमेवाभवति॥ पणायति॥ एवं पन॥ कमु कांतौ॥ कमेः स्वार्थे

त्रिप्रत्ययोवाच्यः॥वृद्धिःसधातुः॥अयपगुणयादेशौ॥कामयते॥कामयेत॥कामयतां॥अकाम
यत॥कामयांचक्रे॥कामयामास॥कामयांबभूव॥आयादय॥असार्वधातुकेवाभवंतिअनपि
विषये॥चकमे॥कामयिषीष्ट॥कमिषीष्ट॥कामयिता॥कमिता॥कामयिष्यते॥कमिष्यते॥अकाम
यिष्यत॥अकमिष्यत॥कामितन इतिस्थिते॥ङेरङ्द्विश्च॥ण्यंताद्धातोर्भूते अर्थे ङ प्रत्ययोभ
वति॥द्विवादिपरःसरपवादः॥धातोश्चद्वित्वं॥णेः॥ङङवर्जितेअनपिविषये॥द्वितिङितिचप
रे॥णेर्लोपोभवति॥ह्रस्वः॥कुहोश्चुः॥आङिलघोर्ह्रस्वउपधायाः॥अङिसतिउपधायाह्रस्वोभ
वति॥पूर्वसंबंधिनोऽकारस्यइकारादेशोभवति॥लघुनिधात्वक्षरेपरे॥लघोर्दीर्घः॥उअङिस
तिह्रसादेर्लघोःपूर्वस्यदीर्घोभवति॥लघुनिधात्वक्षरेपरे॥अचीकमत॥अचीकमेतां॥अ
चीकमंत॥अयगतौ॥अयते॥अयेत॥अयतां॥आयत॥अयांचक्रे॥अयामास॥अयां
बभूव॥अयिषीष्ट॥अयिता॥अयिष्यते॥आयिष्यत॥आयिष्ट॥दयदानहिंसादानेषु॥आ

दानंग्रहणं॥ दयते॥ अयतेवत्प्रक्रिया॥ घटचेष्टायां॥ घटते॥ घटेत॥ घटतां॥ अघटत॥ जघटे॥ घ
टिषीष्ट॥ घटिता॥ घटिष्यते॥ अघटिष्यत॥ अघटिष्ट॥ ईहचेष्टायां॥ ईहते॥ ईहेत॥ ईहतां॥ ऐह
त॥ ईहांचक्रे॥ ईहामास॥ ईहांबभूव॥ ईहिषीष्ट॥ ईहिता॥ ईहिष्यते॥ ऐहिष्यत॥ ऐहिष्ट॥ कास
शब्दकुत्सायां॥ कासते॥ कासेत॥ कासतां॥ अकासत॥ कासांचक्रे॥ कासामास॥ कासांबभूव॥
कासिषीष्ट॥ कासिता॥ कासिष्यते॥ अकासिष्यत॥ अकासिष्ट॥ षेवृसेवने॥ सत्वं॥ सेवते॥ से
वतां॥ असेवत॥ इत्यादेशेसंध्यक्षराणामिकारेकारौचवक्तव्यौ॥ सिषेवे॥ सेविषीष्ट॥ सेवि
ता॥ सेविष्यते॥ असेविष्यत॥ असेविष्ट॥ गाङ्गतौ॥ गाते॥ गातेसवर्णेदीर्घे॥ सहति॥ दीर्घ
स्तते॥ अकारत्वादातोऽन्तोऽदनतः॥ गांते॥ गासे॥ गाथे॥ गाध्वे॥ एति आलोपइत्येके॥ गेगा
वेहा॥ गामहे॥ गेत॥ गेयातां॥ गेरन्॥ गातां॥ गातां॥ गांतां॥ गास्व॥ गाथां॥ गाध्वं॥ गावहि
अगामहि॥ जगे॥ जगाते॥ जगिरे॥ गासीष्ट॥ गाता॥ गास्यते॥ अगास्यत॥ अगास्त॥ रङ

सेवत ५
गे २२
अ२

गतोमाबलोच्य॥रवते॥रवेत॥रवतां॥अरवत॥द्वित्वं॥अनेकस्वरत्वात् असंयोगपूर्वउका
रस्य वत्वे प्राप्ते॥नानेप्यार्वः॥अनपिविषये॥उकारस्य वत्वं न भवति॥तत इव॥रुरुवे॥रुरु
वाते॥रुरुविरे॥रविषीष्ट॥रविता॥रविष्यते॥अरविष्यत॥अरविष्ट॥दुङ् पालने॥ङकार
आत्मनेपदार्थः॥दयते॥दयेत॥दयतां॥अदयत॥दयतेर्णौ दीः दिग्यादेशो द्वित्वाभावो वाच्यः
दिग्ये॥संध्यक्षराणामा॥दासीष्ट॥दाता॥दास्यते॥अदास्यत॥दाधास्थ्वामित्वं सेर्ङित्वमात्म
नेपदं वाच्यं॥ङित्वान्न गुणः॥लोपो ह्स्वात् ह्से॥ह्स्वादुत्तरस्य से लोपो भवति ह्से परे॥अदि
त॥अदिषातां॥अदिषत॥डिङ् विहायसा गतौ॥डयते॥डयेत॥डयतां॥अडयत॥डिड्ये॥डिड्या
ते॥डिड्यिरे॥डयिषीष्ट॥डयिता॥डयिष्यते॥अडयिष्यत॥अडयिष्ट॥द्युत द्योतने॥द्योतते॥द्यो
तेत॥द्योततां॥अद्योतत॥द्युतेः पूर्वस्य संप्रसारणं च वक्तव्यं॥दिद्युते॥दिद्युताते॥दिद्युतिरे॥
द्योतिषीष्ट॥द्योतिता॥द्योतिष्यते॥अद्योष्यत॥अद्योतिष्ट॥द्युतादिभ्यो लुङि वा परस्मैपदं वा

आ०च०

२३

यां॥लितुषादेर्ङः॥वृतु वर्त्तने॥वर्त्तते॥वर्त्तेत॥वर्त्ततां॥अवर्त्तत॥द्विर्भ्येतिद्वित्वं॥पूर्वस्य हस्वा
दिः शेषः॥ववृते॥ववृताते॥ववृतिरे॥वर्त्तिषीष्ट॥वर्त्तिता॥वर्त्तिष्यते॥अवर्त्तिष्यत॥वृद्भ्यः स्य
सयोर्वा परस्मैपदमनिट्त्वं च॥वृतु वृधु शृधु स्यंदू कृपू एते वृतादयः॥वर्त्स्यति॥अवर्त्तिष्यते
अवर्त्स्यत्॥अवर्त्तिष्यत॥अवर्त्तिष्ट॥परस्मैपदपक्षे॥लितुषादेर्ङः॥अवृतत्॥स्यंदू प्रस्र
वने॥स्यंदते॥स्यंदेत॥स्यंदतां॥अस्यंदत॥सस्यंदे॥ऊदितो वा॥स्यंदिषीष्ट॥स्यन्त्सीष्ट॥स्यं
दिता॥स्यंता॥स्यंदिष्यते॥स्यंत्स्यते॥अस्यंदिष्यत॥अस्यंत्स्यत॥अस्यंदिष्ट॥अस्यंत्त प
क्षे अस्यदत॥कृपू सामर्थ्ये ऋ ए॥कृपे रो लः॥कृपेरेफस्य लो भवति॥ऋकारस्य ऌकारो
भवति॥कल्पते॥कल्पेत॥कल्पतां॥अकल्पत॥चकॢपे॥कल्पिषीष्ट॥इडभावपक्षे॥सिस्योः
उपधाया गुणो न भवति॥सिस्योरनिटोः परतः॥कॢप्सीष्ट॥कल्पिता॥कल्प्ता॥कल्पिष्यते॥कल्पि
वति॥ चतुर्षुतिवादिषु परेषु॥ अपोपवादः॥ ङित्वान्न गुणः॥ तुदति॥ तुदतः॥ तुदंति॥ तुदते॥ तुदेत्॥ तु
देत॥ तुदतु॥ तुदतां॥ तुदंतु॥ तुदतां॥ तुदेतां॥ तुदंतां॥ अतुदत्॥ अतुदत॥ तुतोद॥ तुतुदतुः॥ तुतुदुः
तुतुदे॥ तुतुदाते॥ तुतुदिरे॥ तुद्यात्॥ तोत्सीष्ट॥ तोत्ता॥ तोत्तासे॥ तोत्स्यति॥ तोत्स्यते॥ अतोत्स्यत्॥
अतोत्स्यत॥ अतौत्सीत्॥ अतौत्तां॥ अतौत्सुः॥ अतुत्त॥ अतुत्सातां॥ अतुत्सत॥ अतुत्थाः॥ भ्र
स्जो पाके॥ ॐ इत्॥ अन्यत्र सोजः॥ ह्स्य परत्वाभावे सस्य जो भवति॥ ग्रहां क्ङिति चेति संप्रसारणं॥
भृज्जति॥ भृज्जते॥ भृज्जेत्॥ भृज्जेत॥ भृज्जतु॥ भृज्जतां॥ अभृज्जत्॥ अभृज्जत॥ बभर्ज॥ कित्वाभा
वात्संप्रसारणं न॥ बभ्रज्जतुः॥ बभ्रज्जुः॥ भृज्जतेः सरेफो रमागमो वा नपि वा वक्तव्यः॥ बभ्रज्ज॥ ब
भ्रज्जतुः॥ बभ्रज्जुः॥ बभर्ष्ठ॥ बभ्रज्जिथ॥ बभर्जे॥ बभ्रज्जे॥ भृज्ज्यात्॥ भ्रक्षीष्ट॥ भ्रष्टा॥ भर्ष्टा॥ भ्र
क्ष्यति॥ भर्क्ष्यति॥ भ्रक्ष्यते॥ भर्क्ष्यते॥ अभ्रक्ष्यत्॥ अभर्क्ष्यत्॥ अभ्रक्ष्यत॥ अभर्क्ष्यत॥ अभ्रा
क्षीत्॥ अभार्क्षीत्॥ अभ्रष्ट॥ अभर्ष्ट॥ मुच्लृ मोचने॥ मुचादेर्नुम्॥ मुचादीनां नुमागमो भवति

४८

अप्रत्यये परे ॥ मुंचति ॥ मुंचते ॥ मुंचेत् ॥ मुंचेत ॥ मुंचतु ॥ मुंचतां ॥ अमुंचत् ॥ अमुंचत ॥ मुमोच ॥
मुमुचे ॥ मुच्यात् ॥ सिस्योः ॥ मुक्षीष्ट ॥ मोक्ता ॥ मोक्तासे ॥ मोक्ष्यति ॥ मोक्ष्यते ॥ अमोक्ष्यत् ॥ अमोक्ष्य
त ॥ अमुचत् ॥ अमुक्त ॥ लिप उपदेहे ॥ उपदेहं लेपनं ॥ मुच लुप विद लिप सिच कृत पिश खिद एते
मुचादयः ॥ लिंपति ॥ लिंपते ॥ लिंपेत् ॥ लिंपेत ॥ लिंपतु ॥ लिंपतां ॥ अलिंपत् ॥ अलिंपत ॥ लिलेप
लिलिपे ॥ लिप्यात् ॥ लिप्सीष्ट ॥ लेप्ता ॥ लेप्तासे ॥ लेप्स्यति ॥ लेप्स्यते ॥ अलेप्स्यत् ॥ अलेप्स्यत ॥ अलि
पत् ॥ अलिपत ॥ सिचिर् क्षरणे ॥ सिंचति ॥ सिंचते ॥ सिंचेत् ॥ सिंचेत ॥ सिंचतु ॥ सिंचतां ॥ असिं
चत् ॥ सिषेच ॥ सिषिचतुः ॥ सिषिचुः ॥ सिषिचे ॥ सिच्यात् ॥ सिक्षीष्ट ॥ सेक्ता ॥ सेक्तासे ॥ सेक्ष्य
ति ॥ सेक्ष्यते ॥ असेक्ष्यत् ॥ असेक्ष्यत ॥ असिंचत् ॥ असिंचत ॥ असेक्षीत् ॥ असिक्त ॥ इत्युभ
यपदिनः ॥ ॥ अथ परस्मैपदिनः ॥ कृती छेदने ॥ कृंतति ॥ कृंतेत् ॥ कृंततु ॥ अकृंतत् ॥ चकर्त
कृत्यात् ॥ कर्तिता ॥ कर्तिष्यति ॥ कर्त्स्यति ॥ अकर्तिष्यत् ॥ अकर्त्स्यत् ॥ अकर्तीत् ॥ अच्छेद

ने॥ ओव्रश्चू॥ ग्रहांक्ङितिचेति संप्रसारणं॥ वृश्चति॥ वृश्चेत्॥ वृश्चतु॥ अवृश्चत्॥ वव्रश्च॥ वृ
श्च्यात्॥ व्रश्चिता॥ व्रष्टा॥ व्रश्चिष्यति॥ व्रक्ष्यति॥ अव्रश्चिष्यत्॥ अव्रक्ष्यत्॥ अव्रश्चीत्॥ अव्राक्षीत्॥
अव्राष्टां॥ अव्राक्षुः॥ कॄ विक्षेपे॥ ऋत इर्॥ किरति॥ किरेत्॥ किरतु॥ अकिरत्॥ चकार॥ चकरतुः॥
चकरुः॥ कीर्यात्॥ करिता॥ करीता॥ करिष्यति॥ करीष्यति॥ अकरिष्यत्॥ अकरीष्यत्॥ अ
कारीत्॥ उपात्किरतेः छेदे सुड्वक्तव्यः॥ उपस्किरति॥ गॄ निगरणे॥ गिरति॥ गिरत॥ रस्य
लोपोस्वरे वाच्यः॥ गिलति॥ जगार॥ जगरतुः॥ जगरुः॥ जीर्यात्॥ गिरिता॥ गिरीता॥ गिरिष्य
ति॥ गिरीष्यति॥ अगारीत्॥ स्पृश स्पर्शने॥ स्पृशति॥ स्पृशेत्॥ स्पृशतु॥ अस्पृशत्॥ प
स्पर्श॥ स्पृश्यात्॥ स्प्रष्टा॥ स्प्रक्ष्यति॥ अस्प्रक्ष्यत्॥ अस्प्राक्षीत्॥ रोवा॥ अस्पार्क्षीत्॥ प
क्षे सक्॥ अस्पृक्षत्॥ प्रछ ज्ञीप्सायां॥ ग्रहिज्येति संप्रसारणम्॥ पृछति॥ पृछतः॥ पृछंति॥ पृ
छेत्॥ पृछतु॥ अपृछत्॥ पप्रछ॥ पप्रछतुः॥ पप्रछुः॥ पृछ्यात्॥ प्रष्टा॥ प्रक्ष्यति॥ अप्राक्ष्य

त्॥ अप्राक्षीत्॥ सृज विसर्गे॥ विसर्गस्त्यागः॥ सृजति॥ सृजतः॥ सृजंति॥ सृजेत्॥ सृजतु
असृजत्॥ ससर्ज॥ ससर्जतुः॥ ससृजुः॥ सृजि दृशो स्यपिये दृ॥ ससर्जिथ॥ ससष्ठ॥ सृज्या
त्॥ ऋदोरपसे दृशां॥ स्रष्टा॥ स्रक्ष्यति॥ अस्रक्ष्यत्॥ अस्राक्षीत्॥ डुमस्जो शुद्धौ॥ डुओ इतो॥
अन्यत्र सोजः॥ मज्जति॥ मज्जेत्॥ मज्जतु॥ अमज्जत्॥ ममज्ज॥ मज्ज्यात्॥ मक्ता॥ मक्ष्यति॥ अम
क्ष्यत्॥ अमाक्षीत्॥ अमाक्तां॥ अमाक्षुः॥ विछ गतौ॥ गुपूधूपविछिपणिपनिभ्य आयः॥ वि
छायति॥ अलघूपधत्वान्न गुणः॥ विछेरायावेति केचित्॥ विछति॥ विछायेत्॥ विछायतु
अविछायत्॥ विछायांचकार॥ विछाय्यात्॥ विछायिता॥ विछायिष्यति॥ अविछायिष्यत्॥
अविछायीत्॥ विछेत्॥ विछतु॥ अविछत्॥ विविछ॥ विछ्यात्॥ विछिता॥ विछिष्यति॥ अ
विछिष्यत्॥ अविछीत्॥ इषु इच्छायां॥ गमांछ॥ इच्छति॥ इयेष॥ एषिता॥ एष्टा॥ इति परस्मै
पदिनः॥ मृङ् प्राणत्यागे॥ अयक्ङि॥ ऋकारस्य रिङादेशो भवति अकारे प्रत्यये यक्ङि च परे

नुधातोः॥ म्रियते॥ म्रियेत॥ म्रियतां॥ अम्रियत॥ सपरोक्षस्यपतादौ म्रियतेः परस्मैपदं॥ म
मार॥ मम्रतुः॥ मम्रुः॥ मृषीष्ट॥ मर्त्ता॥ मरिष्यति॥ अमरिष्यत्॥ अमृत॥ अमृषातां॥ अमृ
षत॥ दृङ् आदरे॥ द्रियते॥ द्रियेत॥ द्रियतां॥ अद्रियत॥ दद्रे॥ दृषीष्ट॥ दरिता॥ दरिष्यति॥ अ
दरिष्यत॥ अदृत॥ ओविजी भयचलनयोः॥ विजते॥ विजेत॥ विजतां॥ अविजत॥ विविजे
विजिषीष्ट॥ विजिता॥ विजः परोस्मिाद्वजें इट् ङिवत्स्यात्॥ अतो नोपधाया गुणः॥ विजिष्यते॥
अविजिष्यत॥ अविजिष्ट॥ ओलस्जी व्रीडे॥ अन्यत्र सोजः॥ लज्जते॥ लज्जेत॥ लज्जतां॥ अल
ज्जत॥ ललज्जे॥ लज्जिषीष्ट॥ लज्जिता॥ लज्जिष्यते॥ अलज्जिष्यत॥ अलज्जिष्ट॥ ०॥ इति अविकर
णास्तुदादयः॥ ०॥ अथ क्र्यादयः॥ तत्रोभयपदिनः॥ डुक्रीञ् द्रव्यविनिमये॥ विनियमः परि
वर्त्तनः॥ ञुभाविती॥ ना क्र्यादेः॥ क्र्यादेर्गणात् ना प्रत्ययो भवति॥ चतुर्षु परेषु॥ अपोपृथा
दः॥ णत्वं॥ क्रीणाति॥ इ हसे॥ नाइत्याकारस्य लोपो भवति॥ ङिति हसे परे॥ ईकारश्च ङिति

ईकारादेशो

हसे परे ॥ क्रीणीतः ॥ नातः ॥ ना इत्यस्याकारस्य लोपो भवति ङिति स्वरे परे ॥ क्रीणंति ॥ क्रीणा
सि ॥ क्रीणीथः ॥ क्रीणीथ ॥ क्रीणामि ॥ क्रीणीवः ॥ क्रीणीमः ॥ क्रीणीते ॥ क्रीणाते ॥ क्रीणीषे ॥
क्रीणाथे ॥ क्रीणीध्वे ॥ क्रीणे ॥ क्रीणीवहे ॥ क्रीणीमहे ॥ क्रीणीयात् ॥ क्रीणीयातां ॥ क्रीणीयुः
क्रीणीत ॥ क्रीणीयातां ॥ क्रीणीरन् ॥ क्रीणातु ॥ क्रीणीतात् ॥ क्रीणीतां ॥ क्रीणंतु ॥ क्रीणीहि
क्रीणीतात् ॥ क्रीणीतं ॥ क्रीणीत ॥ क्रीणानि ॥ क्रीणीव ॥ क्रीणीम ॥ क्रीणीतां ॥ क्रीणातां ॥ क्री
णांतां ॥ क्रीणीष्व ॥ अक्रीणीत् ॥ अक्रीणीतां ॥ अक्रीणन् ॥ अक्रीणीत ॥ अक्रीणातां ॥ अक्री
णत ॥ चिक्राय ॥ चिक्रियतुः ॥ चिक्रियुः ॥ चिक्रयिथ ॥ चिक्रेथ ॥ चिक्रिये ॥ क्रीयात् ॥ क्रेषीष्ट ॥
क्रेता ॥ क्रेतासे ॥ क्रेष्यति ॥ क्रेष्यते ॥ अक्रेष्यत् ॥ अक्रेष्यत ॥ अक्रैषीत् ॥ अक्रेष्ट ॥ प्वादेर्ह्रस्वः
प्वादीनां द्वाविंशतेर्ह्रस्वो भवति चतुर्षु परेषु ॥ तत्र प्वादयो यथा ॥ पूञ् पवने ॥ लूञ् छेदने ॥
स्तॄञ् आच्छादने ॥ कॄञ् हिंसायां ॥ वृञ् वरणे ॥ धूञ् कंपने ॥ ग्रह उपादाने ॥ दृ हिंसायां ॥ पृ

आ॰ यं॰

४९

पालनपूरणयोः॥स्मृ वरणे॥मृ इत्यन्ये॥दॄ विदारणे॥ज्या वयोहानौ॥नॄ नये॥गॄ शब्दे॥ज्ञा अव
बोधने॥ॠ गतौ॥री पेषणे॥ली श्लेषणे॥लीङ् श्लेषणे॥पुनाति॥पुनीतः॥पुनंति॥पुनीते॥पु
नीयात्॥पुनीता॥पुनातु॥पुनीतात्॥पुनीतां॥पुनंतु॥पुनीतां॥अपुनात्॥अपुनीतां॥अपु
नन्॥अपुनीत॥पपाव॥पुपुवे॥पूयात्॥पविषीष्ट॥पविता॥पविष्यति॥पविष्यते॥अपवि
ष्यत्॥अपविष्यत॥अपावीत्॥कॄ हिंसायां॥कॄणाति॥कॄणीते॥कॄणीयात्॥कॄणीत॥कॄणा
तु॥कॄणीतां॥अकॄणात्॥अकॄणीत॥चकार॥चक्रे॥अतइट्॥कीर्यात्॥करिषीष्ट॥करिता
करीता॥करितासे॥करीष्यति॥करिष्यति॥करिष्यते॥करीष्यते॥अकरिष्यत्॥अकरीष्यत्
अकरिष्यत॥अकरीष्यत॥अकारीत्॥अकरिष्ट॥ग्रह उपादाने॥ग्रहां क्ङिति चेति संप्रसार
णं॥गृह्णाति॥गृह्णीतः॥गृह्णंति॥गृह्णीते॥गृह्णीयात्॥गृह्णीत॥गृह्णातु॥गृह्णीतात्
गृह्णंतु॥हसादानतो॥हसांतात् क्र्यादेर्णात् आन प्रत्ययो भवति हौ परे॥नाप्रत्ययापवादः॥

४९

गृह्णाण॥गृह्णीतात्॥गृह्णीतां॥अगृह्णात्॥अगृह्णीत॥जग्राह॥जगृहतुः॥जगृहुः॥जग्रहि-
थ॥जगृहे॥गृह्यात्॥ग्रहीषीष्ट॥ग्रहीता॥ग्रहीतासे॥ग्रहीष्यति॥ग्रहीष्यते॥अग्रहीष्यत्॥अ-
ग्रहीष्यत॥ ॥ इत्युभयपदिनः॥पुष पुष्टौ॥पुष्णाति॥पुष्णीतः॥पुष्णंति॥पुष्णीयात्॥पुष्णातु॥
पुष्णीतात्॥पुष्णीतां॥पुष्णंतु॥पुषाण॥अपुष्णात्॥पुपोष॥पुष्यात्॥पोष्टा॥पोक्ष्यति॥अपो-
क्ष्यत्॥अपुषत्॥मुष स्तेये॥मुष्णाति॥मुष्णीयात्॥मुष्णातु॥मुष्णीतात्॥मुष्णीतां॥मुष्णंतु
मुषाण॥अमुष्णात्॥अमुष्णीतां॥अमुष्णन्॥मुमोष॥मुष्यात्॥मोषिता॥मोषिष्यति॥अ-
मोषिष्यत्॥अमोषीत्॥शॄ हिंसायां॥शृणाति॥शृणीयात्॥शृणातु॥अशृणात्॥शशार॥
शशरतुः॥शशरुः॥शीर्यात्॥शरिता॥शरिष्यति॥अशरिष्यत्॥अशारीत्॥ज्या वयोहा-
नौ॥ग्रहादित्वात्संप्रसारणं॥प्वादेर्ह्रस्वः॥जिनाति॥जिनीयात्॥जिनातु॥अजिनात्॥जि-
ज्यौ॥जिज्यतुः॥जिज्युः॥जिज्यिथ॥जिज्याथ॥जीयात्॥ज्याता॥ज्यास्यति॥अज्यास्यत्॥अ

आ॰चं॰

५०

ज्यासीत्॥ज्ञा अवबोधने॥ज्ञाजनोर्जा॥जानाति॥जानीयात्॥जानातु॥अजानीत्॥जज्ञौ॥
ज्ञायात्॥ज्ञेयात्॥ज्ञाता॥ज्ञास्यति॥अज्ञास्यत्॥अज्ञासीत्॥कुष निःकर्षे॥निःकोषणं बहि॰
निःसारणं॥कुष्णाति॥कुष्णीयात्॥कुष्णातु॥कुष्णीतां॥कुष्णंतु॥कुषाण॥अकुष्णात्॥चुकोष॥
कुष्यात्॥कोषिता॥कोषिष्यति॥अकोषिष्यत्॥अकोषीत्॥अश भोजने॥अश्नाति॥अश्नीयात्॥
अश्नातु॥अश्नन्तु॥अश्नात्॥आश॥अश्यात्॥अशिता॥अशिष्यति॥आशिष्यत्॥आ
शीत्॥इति परस्मैपदिनः॥ ॥वृङ् संभक्तौ॥वृणीते॥वृणीत॥वृणीतां॥अवृणीत॥वव्रे॥
वरिषीष्ट॥वरिता॥वरिष्यते॥अवरिष्यत॥उश्चेति किद्वान्नगुणः॥अवृत॥अवरिष्ट॥अ
वरीष्ट॥इत्यात्मनेपदी॥इति क्र्यादिप्रक्रिया॥ ॥इति नाविकरणाः क्र्यादयः॥ ॥अथ चुराद
यः॥चुर स्तेये॥चुरादेर्णिः चुरादेर्गणात्स्वार्थे णि प्रत्ययो भवति॥उपधायाश्च गुणः॥सधातुः
तिबादयः अपगुणायः॥चोरयति॥चोरयते॥चोरयेत्॥चोरयेत॥चोरयतु॥चोरयतां॥अ

५०

चोरयतम्॥अचोरयत॥चोरयांचकार॥चोरयामास॥चोरयांबभूव॥चोर्यात्॥चोरयिता॥
चोरयिष्यति॥अचोरयिष्यत्॥णेरङ् द्विश्च॥ह्रस्वः॥णेः॥अङि लघोरुपधायाः॥लघो
दीर्घः॥अचूचुरत्॥अचूचुरतां॥अचूचुरन्॥सौभुभयपदिनः॥अचूचुरत॥चिती संज्ञाने
चेतयति॥चेतयेत्॥चेतयतु॥अचेतयत्॥चेतयांचकार॥चेतयामास॥चेतयांबभूव॥चे
त्यात्॥चेतयिता॥चेतयिष्यति॥अचेतयिष्यत्॥अचीचितत्॥चिति स्मृत्यां इदितः॥चिं
तयति॥चिंतयेत्॥चिंतयतु॥अचिंतयत्॥चिंतयांचकार॥चिंतयामास॥चिंतयांबभूव
चिंत्यात्॥चिंतयिता॥चिंतयिष्यति॥अचिंतयिष्यत्॥लघोरभावे दीर्घः॥अचिचिंतत्॥
अर्च पूजायां॥अर्चयति॥अर्चयेत्॥अर्चयतु॥आर्चयत्॥अर्चयांचकार॥अर्चयामा
स॥अर्चयांबभूव॥अर्च्यात्॥अर्चयिष्यति॥आर्चयिष्यत्॥स्वरादेः परः॥स्वरादेर्धातोरुप
रि द्विरुक्तः स स्वरो द्विर्भवति॥नबदराः संयोगादयो द्विर्न इति रेफस्य न द्वित्वं॥आर्चिचत्॥

अघादं ते॥ गण संख्याने॥ गणयति॥ अल्लोपित्वान्नोपधावृद्धिः॥ गणयेत्॥ गणयतु॥ अगणयत्॥ गणयांचकार॥ गणयामास॥ गणयांबभूव॥ गण्यात्॥ गणयिता॥ गणयिष्यति॥ अगणयिष्यत्॥ अदंतोपि नाङ्कार्ये॥ अजगणत्॥ गणयतेरीकारो वा॥ अजीगणत्॥ कथ वाक्यप्रबंधने॥ कथयति॥ कथयेत्॥ कथयतु॥ अकथयत्॥ कथयांचकार॥ कथयामास॥ कथयांबभूव॥ कथ्यात्॥ कथयिता॥ कथयिष्यति॥ अकथयिष्यत्॥ अचकथत्॥ कथयतेरीकारो वा॥ अचीकथत्॥ ॥ इति चुरादयः॥ धातोः प्रेरणे॥ प्रयोजकव्यापारेऽर्थे णि प्रत्ययो भवति॥ कुर्वंतं प्रेरयति यः प्रयोजयिष्यति॥ अकारयिष्यत्॥ अचीकरत्॥ डुपचष पाके॥ पाचयति॥ पाचयेत्॥ पाचयतु॥ अपाचयत्॥ पाचयांचकार॥ पाच्यात्॥ पाचयिता॥ पाचयिष्यति॥ अपाचयिष्यत्॥ अपीपचत्॥ पठ व्यक्तायां वाचि॥ पाठयति॥ अपीपठत्॥ हन हिंसागत्योः॥ हंतेर्घत्॥ हंतेर्ध्नीतः घ इत्यादेशो भवति ञ्णिती यवर्जिते परतः॥ घातयति

४ सप्रयोज्यकः

घातयेत्॥ घातयतु॥ अघातयत्॥ घातयांचकार॥ घात्यात्॥ घातयिता॥ घातयिष्यति॥ अघा
तयिष्यत्॥ अजीघतत्॥ शद्लृ शातने॥ शदेः शत॥ शदेः शदादेशो भवति॥ णौ परे॥ शातय
ति॥ शातयेत्॥ शातयतु॥ अशातयत्॥ शातयांचकार॥ शात्यात्॥ शातयिता॥ शातयि
ष्यति॥ अशातयिष्यत्॥ अशीशतत्॥ एतोर्णौ पुक्॥ ऋगतावित्यस्य आकारांतस्य च पु
गागमो भवति॥ णौ परे॥ डुदाञ् दाने॥ दापयति॥ दापयेत्॥ दापयतु॥ अदापयत्॥ दापयांचका
र॥ दाप्यात्॥ दापयिता॥ दापयिष्यति॥ अदीदपत्॥ डुधाञ् धारणपोषणयोः॥ धापयति

धापयेत्॥ धापयतु॥ अधापयत्॥ धापयांचकार॥ धाप्यात्॥ धापयिता॥ धापयिष्यति

५८

अधापयिंत्॥ अदीधपत्॥ ऋगंतस्य गुणो वक्तव्यः॥ ऋगतौ॥ अर्पयति॥ अर्पयेत्॥
अर्पयतु॥ आर्पयत्॥ अर्पयांचकार॥ अर्पयामास॥ अर्पयांबभूव॥ अर्प्यात्॥ अर्प
यिता॥ अर्पयिष्यति॥ आर्पयिष्यत्॥ आर्पिपत्॥ ष्ठा गतिनिवृत्तौ॥ स्थापयति॥ स्थापये

आ० धा०
५२

52

त्॥ स्थापयतु॥ अस्थापयत्॥ स्थापयांचकार॥ स्थाप्यात्॥ स्थापयिष्यति॥ स्थापयिता॥ अस्था
पयिष्यत्॥ तिष्ठतेरुपधाया इकारो ङि च लुप्यः॥ द्वित्वं॥ अतिष्ठिपत्॥ पा दर्शने॥ पाभा धामा
कौ॥ भूर्युवर्भवेशांपुगागमो भवति॥ णौ परे॥ पाययति॥ पाययेत्॥ पाययतु॥ अपाययत्॥ पा
पययांचकार॥ पाय्यात्॥ पाययिता॥ पाययिष्यति॥ अपाययिष्यत्॥ पिबतेरङि० सर्वं कारो
पधाया लोपो वक्तव्यो॥ अपीप्यत्॥ षोऽन्तकर्मणि॥ साययति॥ साययेत्॥ साययतु॥ अ
साययत्॥ साययांचकार॥ साय्यात्॥ साययिता॥ साययिष्यति॥ असीसयत्॥ शो तनू
करणे॥ शाययति॥ शाययेत्॥ शाययतु॥ अशाययत्॥ शाययांचकार॥ शाय्यात्॥ शा
ययिता॥ शाययिष्यति॥ अशाययिष्यत्॥ अशीशयत्॥ छो छेदने॥ छाययति॥ छाय
येत्॥ छाययतु॥ अछाययत्॥ छाययांचकार॥ छाय्यात्॥ छाययिता॥ छाययिष्यति॥
अछाययिष्यत्॥ अचीछयत्॥ ह्वेञ् स्पर्द्धायां शब्दे च॥ ह्वाययति॥ ह्वाययेत्॥ ह्वाययतु

अज्ञापयत्॥ज्ञापयांचकार॥ज्ञाप्यात्॥ज्ञापयिता॥ज्ञापयिष्यति॥अज्ञापयिष्यत्॥ज्ञपतेः
रङिः संप्रसारणं॥युगमामाचश्वयत्व्यः॥अजूहवत्॥व्येञ्सं प्रसारणे॥व्यायपति॥व्या
ययेत्॥व्यायपतु॥अव्याप्यत्॥व्यायपांचकार॥व्याप्यात्॥व्याययिता॥व्याययिष्यति
अव्याययिष्यत्॥अविव्ययत्॥वेञ् तंतुसंताने॥वाययति॥वाययेत्॥वाययतु॥अवा
ययत्॥वाययांचकार॥वाप्यात्॥वाययिता॥वाययिष्यति॥अवाययिष्यत्॥अवीवयत्
प्रीञ् तर्पणे॥प्रीञ् धूञोर्नुक्॥अनयोर्नु मागमो भवति॥णौपरे॥प्रीणयति॥प्रीणयेत्
प्रीणयतु॥अप्रीणयत्॥प्रीणयांचकार॥प्रीण्यात्॥प्रीणयिता॥प्रीणयिष्यति॥अप्रीण
यिष्यत्॥अपिप्रीणत्॥धूञ् कंपने॥धूनयति॥धूनयेत्॥धूनयतु॥अधूनयत्॥
धूनयांचकार॥धूनयामास॥धूनयांबभूव॥धून्यात्॥धूनयिता॥धूनयिष्यति॥
अधूनयिष्यत्॥अदूधुनत्॥स्मिङ् ईषद्धसने॥स्मयतेरात्वं णौपरे वाच्यं॥विस्माप

आ॰ चं॰

५३

यते॥ स्मयते हेतुभये आत्मनेपदं वाच्यं॥ विस्मापयते जटिलः॥ अन्यत्र विस्मापयति॥ अ सिस्मयत्॥ रुहे र्वीधापोघ त्रय्यः॥ रुह बीजजन्मनि॥ रोपयति॥ रोहयति॥ रोहयेत्॥ रोहयतु॥ अरोहयत्॥ रोहयांचकार॥ रोह्यात्॥ रोहयिता॥ रोहयिष्यति॥ अरोहयिष्यत्॥ अरूरुहत्॥ कृपू सामर्थ्ये॥ कल्पयति॥ कल्पयेत्॥ कल्पयतु॥ अकल्पयत्॥ कल्पयांचकार॥ कल्प्यात्॥ कल्पयिता॥ कल्पयिष्यति॥ अकल्पयिष्यत्॥ अचीकृपत्॥ अचकल्पत्॥ उपधाया अवर्णस्यादिः॥ अकारयोव त्रय्यः॥ वृतु वर्तने॥ वर्तयति॥ वर्तयेत्॥ वर्तयांचकार॥ वर्त्यात्॥ वर्तयिता॥ वर्तयिष्यति॥ अवर्तयिष्यत्॥ अवीवृतत्॥ अववर्तत्॥ मृजू शुद्धौ॥ मार्जयति॥ मार्जयेत्॥ मार्जयतु॥ अमार्जयत्॥ मार्जयांचकार॥ मार्ज्यात्॥ मार्जयिता॥ मार्जयिष्यति॥ अमार्जयिष्यत्॥ अमीमृजत्॥ अममार्जत्॥ इडादेर्गुरुः॥ इङ् अध्ययने॥ आपयति॥ ह्रीव्लीरीक्नूयीक्ष्मायीनाम्॥ एषां पुगा

५३

गमो भवति ॥ णौ परे ॥ इङ् अध्ययने ॥ अध्यापयति ॥ अध्यापयेत् ॥ अध्यापयतु ॥ अध्यापय
त् ॥ अध्यापयांचकार ॥ अध्याप्यात् ॥ अध्यापयिता ॥ अध्यापयिष्यति ॥ अध्यापयिष्यत्
अध्यजीगपत् ॥ अध्यापिपत् ॥ डुक्रीञ् द्रव्यविनिमये ॥ क्रापयति ॥ क्रापयेत् ॥ क्रापयतु ॥
अक्रापयत् ॥ क्रापयांचकार ॥ क्राप्यात् ॥ क्रापयिता ॥ क्रापयिष्यति ॥ अक्रापयिष्यत् ॥ अ
चिक्रपत् ॥ जि जये ॥ जापयति ॥ जापयेत् ॥ जापयतु ॥ अजापयत् ॥ जापयांचकार ॥ जाप्या
त् ॥ जापयिता ॥ जापयिष्यति ॥ अजापयिष्यत् ॥ अजीजपत् ॥ ह्री लज्जायां ॥ ह्रेपयति ॥ ह्रे
पयेत् ॥ ह्रेपयतु ॥ अह्रेपयत् ॥ ह्रेपयांचकार ॥ ह्रेप्यात् ॥ ह्रेपयिता ॥ ह्रेपयिष्यति ॥ अह्रेपयि
ष्यत् ॥ अजिह्रिपत् ॥ ब्लीङ् वरणे ॥ ब्लेपयति ॥ ब्लेपयेत् ॥ ब्लेपयतु ॥ अब्लेपयत् ॥ ब्लेपयांच
कार ॥ ब्लेप्यात् ॥ ब्लेपयिता ॥ ब्लेपयिष्यति ॥ अब्लेपयिष्यत् ॥ अबिब्लिपत् ॥ रीङ् श्रये ॥ रे
पयति ॥ रेपयेत् ॥ रेपयतु ॥ अरेपयत् ॥ रेपयांचकार ॥ रेप्यात् ॥ रेपयिता ॥ रेपयिष्य

ति॥ अरेपयिष्यत्॥ अरीरिपत्॥ क्नूयी दुर्गंधे च आर्द्रे च॥ वयो र्य लोपो वल्य्यः॥ क्नोपयति॥
अचुक्नुपत्॥ क्ष्मायी विधूनने॥ क्ष्मापयति॥ क्ष्मापयेत्॥ क्ष्मापयतु॥ अक्ष्मापयत्॥ क्ष्मापयां
चकार॥ क्ष्माप्यात्॥ क्ष्मापयिता॥ क्ष्मापयिष्यति॥ अक्ष्मापयिष्यत्॥ अचिक्ष्मपत्॥ नरि
तः॥ अकारेतः शास्त्र श्वादि उल्लंघ्य मध्ये न भवति॥ ढौकृ गतौ॥ ढौकयति॥ ढौकयेत्॥ ढौक
यतु॥ अढौकयत्॥ ढौकयांचकार॥ ढौक्यात्॥ ढौकयिता॥ ढौकयिष्यति॥ अढौकयिष्य
त्॥ अडुढौकत्॥ डुयाचृ याच्ञायां॥ याचयति॥ याचयेत्॥ याचयतु॥ अयाचयत्॥ या
चयांचकार॥ याच्यात्॥ याचयिता॥ याचयिष्यति॥ अयाचयिष्यत्॥ अययाचत्॥ शा
सु अनुशिष्टौ॥ शासयति॥ शासयेत्॥ शासयतु॥ अशासयत्॥ शासयांचकार॥
शास्यात्॥ शासयिता॥ शासयिष्यति॥ अशाशयिष्यत्॥ अशशासत्॥ दुषवैकृदीर्घो
वल्व्यः॥ दुषवेकृत्यो॥ दूषयति॥ अदूदुषत्॥ घट चेष्टायां॥ मितां ह्रस्वः॥ धातुपाठे मि

तइत्येवंपठितानांह्रस्वोभवति॥घटयति॥अजीघटत्॥व्यथदुःखसंचलनयोः॥व्यथय
ति॥अव्यथयत्॥एवंपंचपंचाशतोरूपं॥जनीजॄषुक्नसुरंजोमंताश्च॥जनीत्यादयः
अमंताश्चमितोज्ञेयाः॥जनीप्रादुर्भावे॥जनयति॥अजीजनत्॥जॄषवयोहानौषइत्
जरयति॥अजीजरत्॥क्नसुह्वरणदीप्त्योः॥क्नसयति॥अचिक्नसत्॥रंजरागे॥रंजे
र्मृगरमणेनलोपोवाच्यः॥रजयतिमृगान्लुब्धः॥अरीरजत्॥शमुदमुउपशमे
शमयति॥दमयति॥अशीशमत्॥अदीदमत्॥ज्ञाजनोर्जा॥जनोतेर्वाओह्रस्वोवा
च्यः॥ज्ञाअवबोधने॥ज्ञापयति॥ज्ञपयति॥अजिज्ञपत्॥ज्वलह्वलह्मलनम्ला
स्नाश्चवामितः॥ज्वलयति॥ज्वालयति॥अजिज्वलत्॥ग्लपयति॥ग्लापयति
अजिग्लपत्॥स्नापयति॥स्नपयति॥असिस्नपत्॥ष्णाशौचे॥इणोगोवागमिर्वा
च्यः॥इणगतौ॥गमयति॥अजीगमत्॥गमिअभावपक्षे॥इणिधोतोर्ग्नमिनः

आ॰चं॰

५५

55

आयि॰गुण॥ आययति॥ आयियत्॥ इति प्यंतप्रक्रिया॥ ०॥ अथ सप्रक्रिया॥ इच्छाया
मात्मनः सः॥ धातोरिच्छायामर्थे आत्मनः सप्रत्ययो भवति सा चेत्स्व संबंधिनी दिश्च॥
भू सत्तायां स धातुः धातुत्वात् अप्रतिवादयः आदे आत्मनः भवितुमिच्छति बुभूष
ति॥ बुभूषेत्॥ बुभूषतु॥ अबुभूषत्॥ बुभूषांचकार॥ बुभूष्यात्॥ बुभूषितां॥ बुभू
षिष्यति॥ अबुभूषिष्यत्॥ अबुभूषीत्॥ कुः से॥ उश्च ऋश्च उ ऋतस्मात् उवर्णान्तात् ऋवर्णा
न्ताच्च गम्र हग्रहो श्च से परे इट न भवति॥ नानिटि से॥ इडुतेसे परे गुणो न भवति॥ तॄ प्लु
वन तरणयोः॥ नाम्यंतात्परस्य सस्य कित्वं वाच्यं॥ ऋतइर्॥ तर्तुमिच्छति तितीर्ष
ति॥ तितीर्षेत्॥ तितीर्षतु॥ अतितीर्षत्॥ तितीर्षांचकार॥ तितीर्ष्यात्॥ तितीर्षिता
ति तीर्षिष्यति॥ अतितीर्षिष्यत्॥ अतितीर्षीत्॥ से दीर्घः॥ से परे पूर्वस्य दीर्घो भवति
डुकृञ् करणे॥ चिकीर्षति॥ चिकीर्षांचकार॥ चिकीर्ष्यात्॥ अचिकीर्षीत्॥ चिकीर्ष

५५

यने॥ चिनोतेः सनाद्योः कित्वं वा वक्तव्यम्॥ चेतुमिच्छति॥ चिचीषति॥ अचिचीषीत्॥ सपरोक्ष
योर्जेर्गिः॥ जि जये॥ जेतुमिच्छति जिगीषति॥ जिगीषांचकार॥ अजिगीषीत्॥ युमिश्रणे॥ यो
तुमिच्छति युयूषति॥ अयुयूषीत्॥ यः से॥ पच॥ पक्तुमिच्छति॥ गुणः॥ प्रकृत्यर्थेऽन्यत्र स्वात्म
प्रत्ययादन्यत्र धात्वर्थोऽमुख्यः॥ सप्रत्ययमुख्यः॥ तेनापि पक्षतिः इत्यत्र तृतीयायाः पाकेन
संबोधनत्विच्छया॥ पा पाने॥ पातुमिच्छति पिपासति॥ पिपासांचकार॥ पिपास्यात्॥ अपि
पासीत्॥ मृङ् प्राणत्यागे॥ मर्तुमिच्छति मुमूर्षति॥ मुमूर्षांचकार॥ मुमूर्ष्यात्॥ अमु
मूर्षीत्॥ पोरुः॥ पृ पालनपूरणयोः॥ पुपूर्षति॥ अपुपूर्षीत्॥ वृ वरणे॥ वरितुमिच्छति
वुवूर्षति॥ अवुवूर्षीत्॥ रुदमुषिग्रहिस्वपिप्रच्छिभ्यः॥ सकिद्वक्तव्यः॥ रुदिर् अश्रुविमो
चने॥ रोदितुमिच्छति॥ रुरुदिषति॥ अरुरुदिषीत्॥ विद ज्ञाने॥ वेदितुमिच्छति॥ विवि
दिषति॥ अविविदिषीत्॥ मुष स्तेये॥ मोषितुमिच्छति॥ मुमुषिषति॥ अमुमुषीत्॥ ग्र

आ०चं०

५६

ढः॥षढोः कः सि॥आदिजबानां घत्वं॥ कषसंयोगे क्षः॥ग्रह उपादाने॥ग्रहीतुमिच्छति॥जिघृक्ष
ति॥अजिघृक्षीत्॥प्रच्छ ज्ञीप्सायां॥प्रष्टुमिच्छति॥पिपृक्षति॥अपिपृक्षीत्॥त्यज हानौ॥
त्यक्तुमिच्छति॥तित्यक्षति॥अतित्यक्षीत्॥स्वप्तुमिच्छति॥सुषुप्सति॥असुषुप्सीत्॥अ
तुमिच्छति॥जिघत्सति॥हन हिंसागत्योः॥हन्तेः सोणित्॥हन्तेर्घातोः सो णिद्भवति॥णित्वा
द्वृद्धिः॥अत उपधाया इति॥हन्तुमिच्छति॥जिघांसति॥अजिघांसीत्॥इङः सेगमस्याच्यः
अध्येतुमिच्छति॥अधिजिगांसति॥गमेः स इङ्वाच्यः॥गन्तुमिच्छति॥जिगमिषति॥अ
जिगमिषीत्॥इ स्से दा धा रभ लभ शक पत पद मी मा माङ् मेङ् अस्वरस्य सेपरे इः सा
द्दशो भवति पूर्वस्य लोपः॥डुदाञ् दाने॥दातुमिच्छति॥दित्सति॥अदित्सीत्॥डुधाञ्
धातुमिच्छति॥धित्सति॥अधित्सीत्॥रभ राभस्ये॥स्कोरा घोष्ठ॥स्वसेच पाल सानां
रब्धुमिच्छति रिप्सते॥डुलभष् प्राप्तौ॥लब्धुमिच्छति लिप्सते॥शक्लृ शक्तौ॥शिक्षति॥

५६

स१

अशिश्रीतम्॥ पतोऽथे एपतो धातोः परस्यैप्रत्ययस्य वा इड्भवति॥ पतॢ पतने॥ पतितुमिच्छति॥ पिपति
षति॥ इडभावे इस आदेशः पित्सति॥ अपित्सीत्॥ अपिपतिषीत्॥ पद गतौ॥ पित्सते॥ मा माने
मातुमिच्छति॥ मित्सति॥ माङ् माने॥ मित्सते॥ अमित्सिष्ट॥ आप्लृ व्याप्तौ॥ आप्नोतेरी॥ आ
प्नोतेर्धातोराकारस्य इकारादेशो भवति सपरे॥ ईप्सति॥ ऐप्सीत्॥ अशु भोजने॥ अशरणायो
वा॥ अशेरिच्छायां वा अशनायप्रत्ययो भवति॥ अशितुमिच्छति॥ अशनायति॥ अशिशिषति॥
अशनायीत्॥ अशिशीत्॥ तनि दरिद्राधोः सेड्वा वक्तव्यः॥ तितनिषति॥ तितांसति॥ तनोतेः
सेवा दीर्घः॥ तितांसति॥ अतितनिषीत्॥ दरिद्रा दुर्गतौ॥ दरिद्रितुमिच्छति॥ दिदरिद्रिषति॥
दिदरिद्रासति॥ अदरिद्रिषीत्॥ यदि इसे दीर्घता वक्तव्या॥ दमु दमने॥ ज्ञा अवबोधने॥ दंतुमिच्छ
ति॥ दंभिज्ञाप्योः॥ सपरे धाइ इ॥ पक्षे अनयोः स्वरस्य इस द्विरुक्तिलोपश्च॥ इस इकारस्य दी
र्घता दंभेवा॥ दिदंभिषति॥ ज्ञपिरत्रे मितां ह्रस्वः॥ जिज्ञापयिषति॥ ज्ञीप्सति॥ धीप्सति॥ धि

भावयिष्यति॥ यियावयिष्यति॥ रुरावयिष्यति॥ लिलावयिष्यति॥ इति सन्प्रक्रिया॥ ॥ अथ यङ्
प्रक्रिया॥ ॥ अतिशये हसादेर्यङ् द्विश्च॥ हसादेरेकस्वराद्धातोरतिशयेऽर्थे यङ् प्रत्ययो भव
ति॥ तस्मिन्सति धातोर्द्विर्वचनं॥ यङि॥ यङि परे पूर्वस्य नामिनो गुणो भवति॥ भपानां जब
चपा इति भकारस्य बकारः॥ बोभूय इति स्थिते स धातुः सधातुः इति धातुत्वात्तिबादयः॥
ङित्वादात्मनेपदं॥ अप् अदे इत्यकारलोपः॥ अतिशयेन भवतीति बोभूयते॥ बोभूयते
बोभूयेत॥ बोभूयतां॥ अबोभूयत॥ बोभूयांचक्रे॥ बोभूयिषीष्ट॥ बोभूयिता॥ बोभूयि
ष्यते॥ अबोभूयिष्यत॥ अबोभूयिष्ट॥ भुज पालनाभ्यवहारयोः॥ बोभुज्यते भुवं भूपालः॥
अनपि च हसात्॥ हसादुत्तरस्य यङो लुग्भवति अनपि विषये॥ बोभुजांचक्रे॥ मुह वैचि
त्ये॥ मोमुह्यते॥ लिह आस्वादने॥ लेलिह्यते॥ हु दानादनयोः॥ जोहूयते॥ विद ज्ञाने॥ वेवि
द्यते॥ अतः॥ यङि सति पूर्वस्य अकारस्य आकारादेशो भवति॥ अतिशयेन पचतीति पाप

च्यते ॥ अपापचिष्ट ॥ पठ व्यक्तायां वाचि ॥ पापठ्यते ॥ पद गतौ ॥ पापद्यते ॥ स्वरादावटादीनां यङ्व
त्व्यः ॥ अट गतौ ॥ अश भोजने ॥ उर्णुञ् आच्छादने ॥ ऋ गतौ ॥ एते अटादयः ॥ स्वरादेः परः
आतः अटाटिष्ट ॥ अटाट्यते ध्वजः ॥ अशाश्यते ॥ उर्णोनूयते ॥ नन्दराः संयोगादयो द्वि
र्ने ॥ गुणोऽर्त्तिसंयोगाद्योः ॥ यकारे परे रेफस्य द्वित्वं वाच्यं ॥ अरार्य्यते ॥ जभजपां नुक् ॥ ग्यमं
तस्य जपादीनां पूर्वस्य नुगागमो भवति यङि लुकि सति ॥ जप जभ दह दंश भंज पश एते जपा
दयः ॥ गम्लृ गतौ ॥ अतिशयेन गच्छतीति जंगम्यते तुरंगः ॥ अतिशयेन भ्रमतीति बंभ्रम्य
ते भ्रमरः ॥ अनुसेप्यनुस्वारः ॥ आदेशिनामादेशो निर्दिश्यते ॥ यंयम्यते ॥ क्रमु पादविक्षे
पे ॥ चंक्रम्यते ॥ तमु ॥ तंतम्यते ॥ जंजप्यते ॥ दंदश्यते ॥ बंभज्यते ॥ मत्तो दंतीत हन ॥ नो लोपे
नः ॥ धातोरुपधाभूतस्य नकारस्य लोपो भवति ॥ ङिति हसे परे ॥ पश्या घ्नग्रहणयोः ॥
पंपश्यते ॥ चरफलो रुच्चास्य यङि ॥ चरफलो धातोर्यङि सति पूर्वस्य नुगागमो भवति ॥ अ

आ॰चं॰ ५८

कारस्य परस्य उकारः ॥ चर गतिभक्षणयोः ॥ य्वोर्विहसे दीर्घः ॥ चंचूर्य्यते ॥ पंफुल्यते ॥ नृती गा
त्रविक्षेपे ॥ रीगृदुपधस्य ॥ ऋकारोपधस्य धातोर्यङि सति पूर्वस्य रीगागमो भवति ॥ न
रीनृत्यते नरः ॥ अत्र णत्वाभावो वाच्यः ॥ वृतु वर्त्तने ॥ वरीवृत्यते धात्री स्वचित्तम् ॥ जरीगृ
ह्यते ॥ कृपो रो लः ॥ चनीक्लृप्यते ॥ ऋत्वं तोपि नाग्वाच्यः ॥ वरीवृश्च्यते ॥ परीपृच्छ्यते ॥ व
सेर्यङि न संप्रसारणं ॥ वावस्यते ॥ पदस्रंसुध्वंसुवंचुभ्रंसुकसपतपदस्कंदां यङि ॥ एषां
पूर्वस्य नीगागमो भवति ॥ यङि परे ॥ पनीपद्यते ॥ स्रंसु ध्वंसु भ्रंसु अधःपतने ॥ सनीस्रंस्यते
दनीध्वंस्यते ॥ वंचु गतौ ॥ वनीवच्यते ॥ बनीभ्रंस्यते ॥ कस गतिशातनयोः ॥ चनीकस्यते ॥
पत्लृ पतने ॥ पनीपद्यते ॥ स्कंदिर् गतिशोषणयोः ॥ चनीस्कद्यते ॥ डुकृञ् करणे ॥ यङ् ॥ ऋ
तो रिः ॥ ऋकारस्य रिः आदेशो भवति ॥ यङि सति ततो द्वित्वं ॥ चिक्रियङः पूर्वस्य हसादिः शे
षः चुत्वं यङि तिगुणः ये इति दीर्घः ॥ अतिशयेन करोति इति चेक्रीयते ॥ चेक्रीयेत ॥ चेक्रीय

५८

तां॥ अचेक्रीयत॥ चेक्रीयांचक्रे॥ चेक्रीयिषीष्ट॥ चेक्रीयिता॥ चेक्रीयिष्यते॥ अचेक्रीयिष्य
त॥ अचेक्रीयिषीष्ट॥ हृञ् हरणे॥ जेह्रीयते॥ जेह्रीयांचक्रे॥ अजेह्रीयिष्ट॥ वृञ् वरणे॥ वेव्री
यते॥ अवेव्रीयिष्ट॥ मृङ् प्राणत्यागे॥ मेम्रीयते॥ मेम्रीयेत॥ मेम्रीयतां॥ अमेम्रीयत॥ मे
म्रीयांचक्रे॥ मेम्रीयिषीष्ट॥ मेम्रीयिता॥ मेम्रीयिष्यते॥ अमेम्रीयिष्यत॥ अमेम्रीयिष्ट॥
डुदाञ् दाने॥ दादेरी॥ अपि तु दाधा मागेहाक् पिबति सास्यानामीकारो भवति किति ङिति
हसपरे द्विर्वचनं॥ देदीयते॥ माङ् माने॥ मेमीयते॥ डुधाञ् देधीयते॥ गै शब्दे॥ जेगीयते
ॐ हाक् त्यागे॥ जेहीयते॥ पा पाने॥ पेपीयते॥ षोऽन्तकर्मणि॥ षेषीयते॥ ष्ठा गतिनिवृत्तौ
तेष्ठीयते॥ घ्रा ध्मा री॥ घ्रा ध्मा इत्येतयोरीकारादेशो भवति यङि परे॥ घ्रा गन्धोपादाने॥
जेघ्रीयते॥ ध्मा शब्दाग्निसंयोगयोः॥ देध्मीयते॥ स्वपि स्यमि वेञां संप्रसारणे कृते द्वि
र्वचनमेव॥ सोसुप्यते॥ ञिष्वप् शये॥ स्यमु अदने॥ सेसिम्यते॥ वेञ् संवरणे॥ वेवीयते

हंतेर्हिंसायां यङि घ्नीभावो वक्तव्यः॥ जेघ्नीयते॥ जंघन्यते॥ गत्यर्थेभ्यः कौटिल्य एव यङ्वक्तं व्रज-
ति वाव्रज्यते॥ कवतेर्भ्वादिकस्य ग्रहणं॥ कौतिकुवत्योस्तु त्वमेव॥ चोकूयते॥ कवतेर्यङि
चुत्वाभावो वाच्यः॥ कु शब्दे॥ कोकूयते॥ इति यङ्प्रक्रिया॥ ०॥ अथ यङ्लुक्प्रक्रिया॥ वा-
न्यत्र लुगनुवर्तते॥ अन्यत्रेऽप्युक्प्रत्ययसंयोगं विनापि वा यङो लुग्भवति॥ लुकि सति
पिति त्विमवेकारो वक्तव्यः॥ भू सत्तायां॥ अतिशयेन भवतीति बोभूयते बोभोति॥ बोभू-
तः॥ बोभुवति॥ बोभूयात्॥ बोभवीतु॥ बोभोतु॥ बोभूतात्॥ बोभूहि॥ बोभूतात्॥ अबोभवी-
त्॥ अबोभूत्॥ बोभवांचकार॥ कैश्चिदाम नेष्यते॥ बोभूव॥ बोभूवतुः॥ बोभूवुः॥ वेति के-
चित्॥ बोभाव॥ बोभूयात्॥ बोभविता॥ बोभविष्यति॥ अबोभविष्यत्॥ अबोभूत्॥ अ-
बोभूतां॥ अबोभूवुः॥ यङ्लुगंतं परस्मैपदं ह्लादिवच्च द्रष्टव्यं॥ ह्लादित्वाद्द्वित्वं॥ डुपचष्
पाके॥ अतिशयेन पचतीति॥ पापचीति॥ पापक्ति॥ पापक्तः॥ पापचति॥ पापचीषि॥

पापक्षि॥ पापक्थः॥ पापक्थ॥ पापचीमि॥ पापच्मि॥ पापच्वः॥ पापच्मः॥ पापच्यात्॥ पाप
चीतु॥ पापक्तु॥ पापक्तात्॥ अपापचीत्॥ अपापक्॥ पापचांचकार॥ पापच्यात्॥ पापक्ता
पापक्ष्यति॥ अपापक्ष्यत्॥ अपापक्षीत्॥ भुज पालनाभ्यवहारयोः॥ द्विरेफपिनोपधायागु
णः॥ द्विरुक्तस्य धातोरन्त्यपि स्वरे मउपधायागुणो न भवति॥ बोभुजीति॥ बोभोक्षि॥ बोभु
क्तः॥ बोभुजति॥ बोभुज्यात्॥ बोभुजीतु॥ बोभोक्तु॥ अबोभुजीत्॥ अबोभुक्॥ बोभुजांच
कार॥ बोभुज्यात्॥ बोभुक्ष्यति॥ अबोभुक्ष्यत्॥ अबोभुक्षीत्॥ वद व्यक्तायां वाचि॥ अतिश
येन वदति वावदीति॥ वावत्ति॥ वावत्तः॥ वावदति॥ वावदीषि॥ वावत्सि॥ वावत्थः॥ वावत्थ॥
वावदीमि॥ वावद्मि॥ वावद्वः॥ वावद्मः॥ घट चेष्टायां॥ जाघटीति॥ जाघट्टि॥ जाघट्टः
जाघटति॥ जाघट्यात्॥ जाघटीतु॥ जाघट्टु॥ जाघट्टात्॥ अजाघटीत्॥ अजाघट्॥
जाघटांचकार॥ जाघट्यात्॥ जाघटिता॥ जाघटिष्यति॥ अजाघटिष्यत्॥ अजाघटीत्

श्रा॰ चं॰
६०

डुकृञ्करणे॥ ऋकारांतानां म्ह्रुपधानां च यङ्लुकि रुग्रिग्रीगागमो वक्तव्यः॥ चर्करीति॥ चरि
करीति॥ चरीकरीति॥ चर्कर्ति॥ चरिकर्ति॥ चरीकर्ति॥ चर्कृतः॥ चरिकृतः॥ चरीकृतः॥ चर्क्रति॥ च
रिक्रति॥ चरीक्रति॥ चर्करीषि॥ चरिकरीषि॥ चरीकरीषि॥ चर्कर्षि॥ चरिकर्षि॥ चरीकर्षि॥ चर्कृथ
चरिकृथः॥ चरीकृथः॥ चर्कृथ॥ चरिकृथ॥ चरीकृथ॥ चर्करीमि॥ चरिकरीमि॥ चरीकरीमि
चर्कर्मि॥ चरिकर्मि॥ चरीकर्मि॥ चरीकर्मि॥ चर्कृवः॥ चरिकृवः॥ चरीकृवः॥ चर्कृमः॥ चरिकृ
मः॥ चरीकृमः॥ चर्कृयात्॥ चरिकृयात्॥ चरीकृयात्॥ चर्करीतु॥ चरिकरीतु॥ चरीकरीतु
चर्कर्तु॥ चरिकर्तु॥ चरीकर्तु॥ अचर्करीत्॥ अचरिकरीत्॥ अचरीकरीत्॥ इत्यादि॥ वृतु वर्त
ने॥ वर्वृतीति॥ वरिवृतीति॥ वरीवृतीति॥ वर्वर्ति॥ वरिवर्ति॥ वरीवर्ति॥ वर्वृत्तः॥ वरिवृत्तः
वरीवृत्तः॥ वर्वृतति॥ वरिवृतति॥ इत्यादि॥ वंचु गतौ॥ वनीवंचीति॥ वनीवंक्ति॥ वनीवंक्तः
वनीवचति॥ गम्लृ गतौ॥ जंगमीति॥ जंगंति॥ लोपस्त्वनुदात्तानाम् इति नलोपः॥ जगंतः॥

६०

गमांस्वरे ॥ जग्मुरिति ॥ मो नो धातोः ॥ धातोर्मकारस्य नकारो भवति वमोः परतः पदान्ते च ॥ जगन्मि ॥
जगन्वः ॥ जगन्मः ॥ हन हिंसागत्योः ॥ जंघनीति ॥ जंघंति ॥ जघंतः ॥ जंघ्नति ॥ जाहंति ॥ जाहंति
जाहतः ॥ जाहितः ॥ जाहति ॥ एवं दादेति इत्यादि ॥ ॥ इति यङ्लुक् प्रक्रिया ॥ ॥ अथ नामधातु
प्रक्रिया ॥ नाम्नो य इच्छायाम् ॥ नाम्न इच्छायामर्थे यप्रत्ययो भवति ॥ तत्संनियोगे चाकारस्य ईका
रः ॥ सधातुः ॥ धातुत्वात्तियादयः ॥ आत्मनः पुत्रमिच्छति पुत्रीयति ॥ पुत्रीयेत् ॥ पुत्रीयतु ॥ अ
पुत्रीयत् ॥ अपुत्रीयां चकार ॥ पुत्रीयामास ॥ पुत्रीयांबभूव ॥ पुत्रीय्यात् ॥ पुत्रीयिता ॥ पुत्री
यिष्यति ॥ अपुत्रीयिष्यत् ॥ अपुत्रीयीत् ॥ ओदौतोर्यप्रत्ययः ॥ स्वरवत् ॥ यादौ प्रत्यये ओ
कारौकारयोः अवावौ भवतः ॥ गामिच्छति गव्यति ॥ नावमिच्छति ॥ नाव्यति ॥ स्यति ॥ म
घति ॥ पुष्पघति ॥ अस्मघति ॥ घनीयति ॥ काम्यश्च ॥ पुत्रमिच्छति ॥ पुत्रकाम्यति ॥ करणे
यः ॥ नाम्नः करणेऽर्थे य प्रत्ययो भवति ॥ कंडुं करोति इति कंडूयति ॥ कष्टस्यातीतिकष्ट

यति॥ नमस्यति॥ तपश्चरतीति तपस्यति॥ शब्दादिभ्यो यङ्॥ शब्दवैरकलहाभ्रकण्वमेघाः एते
शब्दादयः॥ शब्दं करोतीति शब्दायते॥ वैरायते॥ कलहायते॥ अभ्रायते॥ मेघायते॥ उष्मबा
ष्पाभ्यामुद्वमने यङ् वाच्यः॥ उष्माणमु— नति॥ उष्मायते॥ बाष्पायते॥ णिरीत्करणे॥ नाम्नो
णिप्रत्ययो भवति करणेऽर्थे स च डित्॥ डित्वाट्टिलोपः॥ अकारो रस्यार्थः॥ उभयपदार्थश्च स
धातुः॥ धातुत्वात्तिवादयः॥ घटइति स्थिते॥ अतउपधाया इति दीर्घः॥ मितां ह्रस्वः॥ अपगु
णयोः घटं करोतीति घटयति॥ मह पूजायां॥ महान्तं करोतीति महयति॥ पृथ्वादेरः॥ पृथुमृदु
दृढभृशकृशपृथ्वादेर्धातोः अकारस्य रो भवति॥ पृथु प्रख्यातौ॥ प्रथयति॥ मृदु म्रदयति॥
दृढ द्रढयति॥ कृश क्रशयति॥ भृश भ्रशयति॥ उठिम् करोति॥ उठयति॥ उठयेत्॥ उठयतु॥
औठयत्॥ णेरङ् द्विश्च॥ स्वरादेः परः॥ अडि पूर्वस्य ठस्य जः॥ औजठत्॥ कर्तुर्यङ्॥ कर्तु
रुपमानादाचारेऽर्थे यङ् प्रत्ययो भवति॥ ये इति दीर्घः॥ श्येन इवाचरति॥ श्येनायते काकः॥

पंडितइवाचरति पंडितायते मूर्खः ॥ पडिः सलोपो दीर्घश्च यक्ङ्व्यः ॥ ओजसोप्सरसो नित्यं पयस
स्तु विभाषया ॥ ओजायते दुर्बलः ॥ अप्सरायते कुरूपा ॥ पयायते पयस्यते तक्रं ॥ सर्वनामभ्यः
क्विप् इत्येके ॥ क्विपलोपः ॥ कृलति ॥ आचारे उपमानात् ॥ उपमानात् क्यप्रत्ययो भवति आचा
रेर्थे अकारस्य ईकारः पुत्रीयति शिष्यमुपाध्यायः ॥ प्रासादीयति भिक्षुः कुट्यां ॥ पर्य्यंकीयति
मंचके ॥ तस्य संतोषशीलस्य कुटिकाप्यसरायते ॥ भृशादिभ्योऽभावे यङ् वा च्व्यः ॥ अभृशो
भृशो भवति ॥ भृशायते ॥ हिमायते ॥ अवभायायते ॥ इत्यादि ॥ अश्ववृषयोर्मैथुनेच्छायां यप्र
त्ययः सुगागमो भवति ॥ अश्वमिच्छति ॥ अश्वस्यति वडवा ॥ वृषमिच्छति । वृषस्यति गौः ॥ क्षीर
लवणयोर्लालसायां ॥ क्षीरस्यति बालः ॥ लवणस्यति उष्ट्रः ॥ ॥ इति नामधातुप्रक्रिया ॥ ॥
अथात्मनेपदव्यवस्था ॥ निविशादेः नित्याद्युपसर्गात्पूर्वका विशादे धातोरात्मनेपदं भव
ति ॥ निविशते ॥ विपराभ्यां जेः विजयते ॥ पराजयते ॥ समो गमादिभ्यः ॥ संगच्छते ॥ संपृच्छते

संस्वरते॥ समृच्छते॥ संशृणुते॥ संचित्ते॥ संविदाते॥ वेत्तेरंतो वा रुट्॥ संविद्रते॥ दृशेर्वाच्यं॥
संपश्यते॥ गमऋच्छप्रच्छस्वरश्रुस्कृविद एते गमादयः॥ आङो दोनास्यविहरणे॥ आङ्पूर्वाद्द
दातेरात्मनेपदं भवति॥ मुखप्रसारणव्यतिरिक्तेऽर्थे॥ आदत्ते सुखं व्याददाति अत्र न॥ क्रीडोऽनु
परिसंपरिभ्यश्च॥ अनुसंपरिभ्यश्च क्रीडतेरात्मनेपदं भवति॥ क्रीड विहारे॥ अनुक्रीडते
संक्रीडते॥ परिक्रीडते॥ शब्दे तु संक्रीडति रथश्चक्रम्॥ समवप्रोपविभ्यः स्थः॥ एभ्यस्तिष्ठते
रात्मनेपदं भवति॥ संतिष्ठते॥ अवतिष्ठते॥ प्रतिष्ठते॥ उपतिष्ठते॥ वितिष्ठते॥ आङो यमहनः
आङ्परयोर्यमहनोरात्मनेपदं भवति॥ आयच्छते॥ आहते॥ अकर्मकात्स्वांगकर्मकाद्
यो वा॥ आयच्छते पाणिम्॥ आहते शिरः॥ अन्यथा परशिरः आयच्छति॥ शत्रुमाहंति
उद्विभ्यां तपः॥ उद्विभ्यां परस्य स्वांगकर्मकस्य धातपतेरात्मनेपदं भवति॥ उत्तपते॥ वि
तपते पाणिम्॥ अन्यथा महीं वितपत्यर्कः॥ उदश्च त्यागे॥ उत्सर्गाच्चरतेस्त्यागेऽर्थे आत्म

नेपदं भवति ॥ धर्ममुच्चरते त्यजतीत्यर्थः ॥ त्यागे किम् ॥ मंत्रमुच्चरति ॥ समस्तृतीयायुक्तात् ॥
संपूर्वाच्चरतेस्तृतीयांतेन पदेन युक्तादात्मनेपदं भवति ॥ अश्वेन संचरते ॥ व्यवपरिभ्यः क्री
ञः ॥ एभ्यः क्रीणातेरात्मनेपदं भवति ॥ विक्रीणीते ॥ परिक्रीणीते ॥ शप उपालंभे ॥ उपा
लंभेऽर्थे शपतेरात्मनेपदं भवति ॥ वाचा शरीरस्य ॥ शपथ उपालंभः ॥ विप्राय शपते ॥ वि
प्र शरीरस्पृशामीति शपथं करोमीत्यर्थः ॥ उपालंभे किं दुष्टं शपति शापं ददातीत्यर्थः ॥ ज्ञा
श्रुस्मृदृशां शांतानामात्म ॥ सप्रत्ययांतानामेषामात्मनेपदं भवति ॥ धर्मं जिज्ञासते ॥ शु
श्रूषते ॥ सुस्मूर्षते ॥ दिदृक्षते ॥ अनुपूर्वाज्जानातेः शांतादपि न ॥ अनुजिज्ञासति पु
त्रं ॥ कर्मव्यतिहारे ॥ अन्यत्र हिंसादेः ॥ कर्मव्यतिहारेऽर्थे वाच्ये हिंसार्थात् ॥ गत्यर्थात् प्रज
ल्पहसात् विहाय ॥ इतरेतर अन्योन्य परस्पर उपपदाभावे सर्वेभ्यो धातुभ्यः आत्मनेप
दं भवति ॥ परस्परक्रियाकरणं कर्मव्यतिहारः ॥ अव्यतिभवते ॥ व्यतिस्ते ॥ जिवदंते याहि

आ॰चं॰

६३

न:॥अन्यत्रेति किं॥व्यतिषंति॥व्यतिगच्छंति॥व्यतिपठंति॥व्यतिजल्पंति॥व्यतिहसंति॥इत
रेतरं परस्परं अन्योन्यं॥वा व्यतिलुनंति॥भुज भोजने आत्मनेपदं वाच्यं॥भुंक्ते ओदनं
भुनक्ति महीमृन्नृपः॥ ॥इति आत्मनेपदव्यवस्था॥ ॥अथ भावकर्मणोर्यक् प्रक्रियानि
रूप्यते॥यक् चतुर्षु॥धातोर्भावे कर्मणि च यक् प्रत्ययो भवति॥चतुर्षु परेषु परतः॥यक्का
रो गुणप्रतिषेधार्थः॥आङ्गुविकर्मणि॥अकर्मकेभ्यो धातुभ्यो भावे सकर्मकेभ्यश्च कर्मण्यात्मने
पदं भवति॥यिकर्मनिरपेक्षां क्रियामाकुर्वतेऽकर्मकाः भूएधआसशीङ् प्रभृतयः॥तदु
सत्ता लज्जास्थितिजागरणं वृद्धिक्षयभयजीवितमरणं॥शयनक्रीडारुचिदीप्त्यर्थं धा
तुगणं तमकर्मकमाहुः॥भावस्यैकत्वादेकवचनमेव भवति प्रथमपुरुषस्य॥भूयते
भवता॥भवद्भिर्भूयते॥अत्र कथं बहुवचनं॥तदुक्तं॥कर्तृभेदं विनावश्यं धात्वर्थो भि
द्यते यतः॥एकमेव क्रियाव्यक्तिं वहुषु योजयन्त्यपि॥भूयेत॥भवता॥अभूयत॥बभू

६३

ये॥ स्वरांतानां हनगहदृशां भावकर्मणोः सिस्यतासीस्ययामिट्‌णिवद्वा स्यःणित्वाद्वृद्धिः॥ भावि
षीष्ट॥ भविषीष्ट॥ भाविता॥ भविता॥ भाविष्यते॥ भविष्यते॥ अभाविष्यत॥ अभविष्यत॥ इ
णत कर्तरि॥ धातोस्तनि परे भावे कर्मणि च इण् प्रत्ययो भवति॥ सेरपवादः॥ णम्मारो ह्यर्थः
तनो लोपः॥ इण्संनियोगे तनो लोपो भवति॥ अभावि॥ अकर्मकोपि कृतार्थकर्मतामनुभ
वति॥ रूपं च॥ उपसर्गेन हि धात्वर्थो बलादन्यत्र नीयते॥ विहाराहारसंहारप्रतीहारप्रहारवत्
धात्वर्थं बाधते कश्चित्कश्चित्तमनुवर्तते॥ विशिनष्टि तमेवार्थमुपसर्गगतिस्त्रिधा॥ कर्मणि
तु॥ सुखमनुभूयते स्वामिना॥ अनुभूयतेऽनुभूयते॥ अनुभूयंते॥ विधौ॥ अनुभूयेत॥ अ
नुभूयेतां॥ अनुभूयेरन्॥ अनुभूयतां॥ अनुभूयेतां॥ अनुभूयंतां॥ अन्वभूयत॥ अन्वभू
येतां॥ अन्वभूयंत॥ अनुबभूवे॥ इत्यादि॥ अन्वभावि॥ भूयो॥ भूयतां॥ अन्वभाविषातां
अन्वभविषातां॥ एध्यते धार्मिकैः॥ एध्येते॥ एध्यंते॥ एध्येत॥ शीङ् स्वप्ने॥ शीङो य ङिं तु

कियपुरोाच त्कव्यः॥शाय्यते भूतेङ्ग्रेण॥शिव्ये॥शायिषीष्ट॥शयिषीष्ट॥अशायि॥ यकर्मसापेक्षांत्रि
यामाकुर्स्ते सकर्मकाः॥ अयकि॥ घटः क्रियते॥ त्यङुः स्त्रीत्रियसे॥ रागेर्षि रागेः स्व रय्य हंद्रिये॥ च
के॥ कारिषीष्ट॥ कृषीष्ट॥ कारिता॥ कर्ता॥ कारिष्यते॥ करिष्यते॥ अकारिष्यत॥ अकरिष्यत॥
अकारि॥ अकारिषातां॥ अकारिषत॥ अकृषत॥ चिञ् चयने॥ चीयते॥ चिच्ये॥ चायिषी
ष्ट॥ चेषीष्ट॥ चायिता॥ चेता॥ चायिष्यते॥ चेष्यते॥ अचायिष्यत॥ अचयिष्यत॥ अचायि
अचायिषातां॥ अचेषातां॥ दादि॥ दीयते॥ दीयेत॥ दीयेतां॥ देदविदे॥ अदोदीयतां॥ अ
दीयत॥ ददे॥ आतोयुक्॥ आकारांतात्धातोर्युगागमो भवति॥ चिति लिति परे॥ दायिषीष्ट
दायिता॥ दाता॥ दायिष्यते॥ दास्यते॥ अदायिष्यत॥ अदायि॥ अदायिषातां॥ दाधास्वा
मित्वं॥ अदिषातां॥ डुधाञ् निपूर्वः॥ निधीयते॥ निधीयेत॥ निधीयतां॥ धान्यं॥ न्यसौ
न्यधीयत॥ न्यधीयेतां॥ न्यधीयंत॥ अधायि॥ अधायिषातां॥ अधायिषत॥ ष्ठा गतिनि

वृत्तौ॥स्त्यीयते॥स्त्यीयेत॥स्त्यीयतां॥अस्त्यीयत॥तस्त्ये॥अस्त्यायि॥अस्त्यायिषातां॥अस्त्या
यिषत॥ष्टुञ् स्तुतौ॥स्तूयते॥तुष्टुवे॥अस्तावि॥अस्ताविषातां॥अस्तोषातां॥हरि हरौ
भ्रूलेन॥हन हिंसागत्योः॥हन्यते॥जघ्ने॥घानिषीष्ट॥हंसीष्ट॥घानिता॥हंता॥घानिष्य
ते॥हनिष्यते॥अघानिष्यत॥अहनिष्यत॥अघानि॥अघानि॥अघानिषातां॥हनि
आत्मनेसिचि हन्वधः॥लोपस्त्वनुदात्तानां॥अहसातां॥अहसत॥हंतेर्घ धादेशः॥
अवधि॥अवधिषातां॥अवधिषत॥ग्रह उपादाने॥ग्रहाक्ङितिचेति संप्रसारणं॥गृ
ह्यते॥गृह्येत॥गृह्यतां॥अगृह्यत॥अजगृहे॥ग्राहिषीष्ट॥इडयोग्रहाम्॥ग्रहीषीष्ट॥
ग्राहिता॥ग्रहीता॥ग्राहिष्यते॥ग्रहीष्यते॥अग्राहिष्यत॥अग्रहीष्यत॥अग्राहि॥अग्रा
हिषातां॥अग्राहिषातां॥दृशिर प्रेक्षणे॥दृश्यते॥ददृशे॥दर्शिषीष्ट॥दृक्षीष्ट॥दर्शि
ता॥द्रष्टा॥अरोऽसे दृशः॥दर्शिष्यते॥द्रक्ष्यते॥अदर्शिष्यत॥अद्रक्ष्यत॥अदर्शि॥अ


दर्शिषातां॥अद्रक्षातां॥अदर्शिषत॥अदृक्षत॥डुपचष पाके॥पच्यते॥पच्येत॥पच्यतां॥अ
पच्यत॥पेचे॥पचाते॥पचिरे॥पक्षीष्ट॥पक्ता॥पक्ष्यते॥अपक्ष्यत॥अपाचि॥अपक्षा
तां॥तनोतेर्नोवा॥तनोतेर्णकारस्य वा आत्वं भवति॥यक्षिपरे॥तायते॥तन्यते॥तेने॥अ
तानि॥अतनिषातां॥अतनिषत॥शमउपशमे॥शमां दीर्घः॥शाम्यते मुनिना॥धातोः प्रे
रणे॥मितां ह्रस्वः॥मेः॥शम्यते मोहो हरिणा॥शमयांचक्रे॥ण्यंतानां मितां मिणि ह्रू दीर्घ
श्च्या॥अशामि॥अशमि॥अशामिषातां॥अशमिषातां॥णिहृदिङ्गावपक्षे॥अशमि
षातां॥गुणार्त्तिसंयोगाद्योः॥अर्य्यते॥स्मर्य्यते॥यत्कर्मगुणसंयोगात् कर्तृत्वेन विवक्ष्य
ते॥स कर्मकर्त्ता तदुक्तं॥क्रियमाणं तु यत्कर्म स्वयमेव प्रसिद्ध्यति॥सुकरैः स्वैर्गुणैर्यस्मा
त्कर्मकर्त्तेति तद्विदुः॥तत्राप्येतदेवोदाहरणं॥लूञ् छेदने॥लूयते केदारः स्वयमेव॥लु
लुवे॥अलावि॥अलाविषातां॥अलविषातां॥डुपचष पाके॥पच्यते ओदनः स्वयमेव

भिदिरविदारणे॥ भिद्यते काष्ठं स्वयमेव॥ अभेदि॥ दुहस्नुनमां॥ कर्मकर्तरि यगिणौ न स्तः॥ दुग्धे
स्नुते गौः स्वयमेव॥ नमते दंडः स्वयमेव॥ अदुग्ध॥ अस्नोष्ट॥ अनंस्त॥ अथ द्विकर्मकाः॥ दुहि
याच्यरुधिप्रछिभिक्षिचिब्रुशासजिकर्मयुङ्नीहृकृषमंथवहदंडिग्रहिमुषिवपविधमेमाकृ
णयादयो एयं तस्मिः कर्मगत्यर्थाशुरव्यकर्मणि॥ प्रत्येयं मांतिदुह्यादिः गौणेन्ये तु यथारुचि॥ नि
त्येविजनमजागरिरजनि॥ मगमिमदमयाचिसंयोगोपीहावेमकार्थतभावश्यैमनंतेन
कार्तुरिषं तत्प्रधानं कर्म॥ अन्यदप्रधानं॥ णीप्रापणे॥ नगरं नीयते नागरिकैर्वनेचरः॥
डुयाच्ययाचनायां॥ भोजनं याच्यते यजमानो याचकेन॥ प्रयच्छज्ञीप्सायां॥ ग्रहांक्रितिचेति
संप्रसारणं॥ पृच्छते पंथानं पथिकेन पांथः॥ शिष्येणाचार्यः॥ स्तत्वं पृच्छ्यते॥ चिकीर्ष्यते
दयदत्तेन॥ यतः॥ यकारस्याकारस्य लोपो भवति॥ अनपिविषये॥ भावे कर्मणि च॥ वोभू
यते॥ बोभूयते॥ अनपि च हसात्॥ पापच्यते॥ पापचिता॥ अपापचि॥ अपाषचि॥ इत्या

आ० चं०

६६

दि॥ इति भावकर्मणोर्यक् प्रक्रिया॥ ॥ वर्तमानेऽर्थे तेयात्र अपि विभक्तेः स्मयोगे भूतार्थता वाव
त्व्या॥ आह स्म हारीतः॥ यजति स्म युधिष्ठिरः॥ यावत् पुरा निपातयोगे भविष्यत्यर्थे ति वाद
यः॥ यावत् करोति॥ करिष्यतीत्यर्थः॥ इत्यादि॥ स्मरत्यर्थयोगे भूतेऽर्थे लृट् स्मरसि कृष्ण स्वं पर्युप
रिष्यसि उपां कुरु इत्यर्थः॥ इति लकारार्थप्रक्रिया॥ ॥ धातूनामनन्तत्वात् तानार्थत्वाच्च सर्वथा
अभिधातुमशक्यत्वाद् अलमाख्यातवर्णनेन॥ ॥ इति श्रीसूरिसिंहविरचिता आख्यातचं
द्रिका समाप्ता॥ ॥ श्रीशुभमस्तु॥ ॥ इदं पुस्तकं लिखितं पट्टवर्द्धनोपनामक आत्माराम
मभट्टेन॥ स्वार्थं॥ परार्थं च॥ सं० १८०० शा० १६६५ माघ शुक्ल एकादश्यां शनौ॥ श्रीशिवाय नमः
गोविंदाय नमः सरस्वत्यै नमः



६६